


SURYA NAMASKARA
1
2
3
4
5
6
7
8
9
10
11
12

# SOORYA NAMASKARAM


| SR NO | DETAILS | PAGE |
|---|---|---|
| 1 | Lighting the Lamp | 3 |
| 2 | Bhagya Sooktam | 3 |
| 3 | Sudarshana mantram | 5 |
| 4 | Ganapathi Prarthana | 5 |
| 5 | Saraswathi Prarthana | 5 |
| 6 | Ganapathi Pooja Vidhi | 6 |
| 7 | Ganapatyatharva Sheersham | 12 |
| 8 | Varuna Sooktam | 16 |
| 9 | Pavamana Sooktam | 18 |
| 10 | Purusha Sooktam | 21 |
| 11 | Maha Narayanam | 24 |
| 12 | Brahma Sooktam | 26 |
| 13 | Vishnu Sooktam | 27 |
| 14 | Rudra Sooktam | 28 |
| 15 | Durga Sooktam | 29 |
| 16 | Shree Sooktam | 30 |
| 17 | Bhoo Sooktam | 32 |
| 18 | Aayushya Sooktam | 34 |
| 19 | Medha Sooktam | 36 |
| 20 | Eikamatya Sooktam | 37 |
| 21 | Swasti Sooktam | 38 |
| 22 | Navagruha Namaskaram | 39 |
| 23 | Soorya Namaskaram | 44 |
| 24 | Concluding Slokas-Soorya Namaskaram | 104 |
| 25 | Navagruha Stotram | 108 |
| 26 | Aaditya Hridayam | 110 |
| 27 | Indrakshi Stotram | 115 |
| 28 | Hanuman Chalisa | 121 |



*Compiled By Shri N K Venkitaraman.*


************


For a free copy of printable PDF file write to
nkv.nvr@gmail.com

# SOORYA NAMASKARAM

## FIRST LIGHT THE LAMPS.

Place the Ganesh idol made of turmeric in a plate. Sit facing East or West or north but not facing the South. Apply sandal paste and kumkum on the forehead and then garland with flowers.

## ॥ भाग्य सूक्तम् ॥

प्रातरग्निं प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रात-सोममुत रुद्रꣳ हुवेम ।
प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्र-मदितेर्यो विधर्ता ।
आद्-ध्र-श्चिद्यं मन्यमान-स्तुर श्चिद्राजा चिद्यं भगं भक्षीत्याह ।
भग प्रणेत-र्भग सत्यराधो भगेमां धियमुद वददन्नः ।
भग प्रणो जनय गोभिरश्वै र्भग प्र-नृभि र्नृ-वन्त स्याम ।
उतेदानीं भगवन्त स्या-मोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्-त्सूर्यस्य वयं देवानाꣳ सुमतौ स्याम ।
भग एव भगवाꣳ अस्तु देवा-स्तेन वयं भगवन्त स्याम ।
तन्त्वा भग सर्व इज्जो-हवीमि सनो भग पुर एता भवेह ।

समध्वरायो-षसो नमन्त दधिक्रावेव शुचये पदाय ।

अर्वाचीनं वसुविदं भगन्नो रथमिवा-श्वा वाजिन आवहन्तु ।

अश्वावती र्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।

घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिः सदा नः ।

यो माऽग्ने भागिनꣳ सन्त मथा भागं चिकी-र्षति ।

अभाग-मग्ने तं कुरु मामग्ने भागिनं कुरु ॥

ॐ शान्ति श्शान्ति श्शान्तिः ।

ooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooooo

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।

ध्रुवं त इन्द्र श्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥

देवीं वाचम जनयन्त देवाः । तां विश्व-रूपाःपशवो वदन्ति ।

सानो मन्त्रेष मूर्जं दुहाना । धेनु-र्वागस्मा-नुप सुष्टु-तैतु ।

सु-मुहूर्तोऽस्त्वि-त्यनु-गृह्णन्तु । सु-मुहूर्तोऽस्तु ।

सु-प्रतिष्टित-मस्तु ॥

## ॥ सुदर्शन मंत्रम् ॥

ॐ क्लीम् कृष्णाय गोविन्दाय गोपीजन वल्लभाय पराय परम् पुरुषाय परमात्मने। पर कर्म मन्त्र तन्त्र यन्त्रौषधास्त्र शस्त्राणि संहर संहरा मृत्त्योर् मोचय मोचया।

ॐ नमो भगवते महा सुदर्शनाय दीप्त्रे ज्ज्वाला परीताय सर्व दिक्क्षोभण कराय हुम्फट् भ्रह्मणे परम् ज्योतिषे स्वाहाः॥

॥ श्री गुरुभ्यो नमः। हरिः ओम्। ॥

## ॥ गणपति ध्यानम् ॥

ॐ गणानां त्वा गणपतिं॒ हवामहे कविं कवीनामुपमश्रवस्तमं।
ज्येष्ठराजं ब्रम्हणां ब्रम्हणस्पत आ नः श्रृण्वन्नूतिभिस्सीद सादनं॥

॥ ॐ श्री महागणपतये नमः॥

## ॥ सरस्वति प्रार्थना ॥

प्रणो देवी सरस्वती वाजे-भि-र्वाजिनी-वती। धीना-मवित्र्य-वतु॥

॥ वाग्देव्यै नमः॥

# गणपति पूजा विधिः

**Aachamaniyam :**

ॐ अच्युताय नमः। ॐ आनन्दाय नमः। ॐ गोविंदाय नमः।

केशवा। नारायणा। माधवा। गोविंदा। विष्णो। मधुसूदना।

त्रिविक्रमा। वामना। श्रीधरा। हृषीकेशा। पद्मनाभा। दामोदरा॥

Ring the bell as you chant the following mantra :

आगमा-र्थन्तु देवानां गमना-र्थन्तु राक्षसाम्।

कुरु घंटा-रवं तत्र देवता-वाहन लांछनम्॥

**Guru dhyanam :**

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुः साक्षात्परब्रह्म तस्मै श्री गुरवेनमः॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम्।

निधये सर्वविद्यानां दक्षिणामूर्तये नमः॥

**Ganapati Dyanam :**

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये॥

**Prana Yamam:**

ॐ भूः।ॐ भुवः।ॐ स्वः।ॐ महः।ॐ जनः।ॐ तपः।ॐ सत्यम्।

ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही धियो यो नः प्रचोदयात्॥

ॐ आपो-ज्योति रसो-मृतं ब्रह्म भूर्भुवस्सुवरोम्॥

**Sankalpam :**

ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं करिष्यमाणस्य

कर्मणः निर्विघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वर पूजां करिष्ये ॥

(Pour a spoonful of water on your palms, wipe them and say :)

अपउपस्पृश्य ॥

(Take some flowers and rice (akshata) in your hands and chant :)

ॐ गणानां त्वा गणपतिꣳ हवामहे कविं कवीनामुपमश्रवस्तमं ।

ज्येष्ठराजं ब्रम्हणां ब्रम्हणस्पत आ नः श्रृण्वन्नूतिभिस्सीद् सादनं ॥

ॐ श्री महागणपतये नमः ।

**Aavahanam**

ॐ भूर्भुवस्सुवरोम् ॥ अस्मिन् हरिद्राबिम्बे सुमुखं

महागणपतिं ध्यायामि । महागणपतिं आवाहयामि ॥

**Aasanam -**

ॐ महागणपतये नमः । रत्नसिंहासनं समर्पयामि ।

**Paadhyam and snaanam :**

(Offer a spoon of water into a plate or bowl :-)

ॐ महागणपतये नमः । पादयोः पाद्यं समर्पयामि ।

ॐ महागणपतये नमः । हस्तयोः अर्घ्यं समर्पयामि ।

ॐ महागणपतये नमः । आचमनीयं समर्पयामि ।

ॐ महागणपतये नमः । स्नानं समर्पयामि ।

ॐ महागणपतये नमः । स्नानानन्तरं आचमनीयं समर्पयामि ।

**Vastram, Upavitham and Aabharanam -**

(After chanting each mantra, offer akshata (rice) with flowers or tulsi leaf: )

ॐ महागणपतये नमः । वस्त्रं समर्पयामि ।

ॐ महागणपतये नमः । यज्ञोपवीतं समर्पयामि ।

ॐ महागणपतये नमः । आभरणार्थं समर्पयामि ।

**Chandanam -**

(Apply sandalpaste on the forehead of the idol (or photoframe) and chant )

ॐ महागणपतये नमः । दिव्य परिमळ गन्धान् धारयामि ।

**Kumkum -**

(Apply kumkum on top of the sandal paste and chant :)

ॐ महागणपतये नमः । गन्धस्योपरि हरिद्राकुंङ्कुमं समर्पयामि ।

**Akshata -**

ॐ महागणपतये नमः । अक्षतान् समर्पयामि ।

**Pushpam -**

ॐ महागणपतये नमः । पुष्पाणि पूजयामि ।

(After each of the following mantra offer a flower : )

ॐ सुमुखाय नमः । ॐ एकदन्ताय नमः । ॐ कपिलाय नमः ।

ॐ गजकर्णकाय नमः । ॐ लम्बोदराय नमः । ॐ विकटाय नमः ।

ॐ विघ्नराजाय नमः । ॐ विनायकाय नमः । ॐ धूमकेतवे नमः ।

ॐ गणाध्क्षाय नमः । ॐ फालचन्द्राय नमः । ॐ गजाननाय नमः ।

ॐ वक्रतुण्डाय नमः । ॐ शूर्पकर्णाय नमः । ॐ हेरम्बाय नमः ।

ॐ स्कन्दपूर्वजाय नमः । ॐ मूलप्रकृतये नमः । ॐ क्षेत्रपालाय नमः ।

ॐ गुरुभ्यो नमः । ॐ सिद्धिविनायकाय नमः ।

ॐ नानाविध परिमळ पत्र पुष्पानि समर्पयामि ।

**Prarthana :**

गजाननं भूतगणादिसेवितं कपित्थजंबूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं नमामि विघ्नेश्वरपादपङ्कजम् ॥

अभीप्सि-तार्थ-सिद्ध्यर्थं पूजितो यः सुरा-सुरैः ।
सर्व-विघ्न-हर-स्तस्मै गणाधि-पतये नमः ॥

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्ता-वासं स्मरे-न्नित्यं आयुः कामार्थ-सिद्धये ॥

अ-गजानन-पद्मार्कं गजानन-महर्निशम् ।
अनेक-दन्तं भक्तानां एकदन्त-मुपास्महे ॥

गज-वक्त्रं सुर-श्रेष्ठं कर्ण-चामर-भूषितम् ।
पाशांकुश-धरं देवं वन्देऽहं गण-नायकम् ॥

एकदंतं महाकायं तप्त-काञ्चन-सन्निभम् ।
लंबोदरं विशालाक्षं वन्देऽहं गणनायकम् ॥

कार्यं मे सिद्धिमा-यातु प्रसन्ने त्वयि धातरि ।
विघ्नानि नाशमा-यान्तु सर्वाणि सुरनायक ॥

**Dhoop :**

Light two agarbattis and show it to the Lord accompanied by the ringing of the bell:

ॐ महागणपतये नमः। धूपं आघ्रापयामि।

**Deepam:**

Show small accompanying lamp to the Lord accompanied by ringing of bell:

ॐ महागणपतये नमः। दीपं सन्दर्शयामि।

ॐ महागणपतये नमः। धूपदीपानन्तरं आचमनीयं समर्पयामि।

**Naivedyam :**

Offer coconut / beetlenut & leaf etc. before the Lord, put Tulsi leaves on it.

ओं भूः भुवः स्सुवः । ओं तथ्सवितुर्वरेण्यं ।

भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥

देव सवितः प्रसुव । सत्यं त्वर्तेन परिषिंचामि ।

अमृतोपस्तरणमसि । ॐ प्राणाय स्वाहा ।

ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा ।

ॐ उदानाय स्वाहा । ॐ समानाय स्वाहा । ॐ ब्रह्मणे स्वाहा ।

ॐ महागणपतये नमः। कदळी फलं निवेदयामि।

निवेदयानंन्तरं आचमनीयं समर्पयामि।

मध्ये मध्ये अमृतपानीयं समर्पयामि। अमृतापिधानमसि।

हस्त प्रक्षालनं समर्पयामि। पाद प्रक्षालनं समर्पयामि।

आचमनियं समर्पयामि॥

Then put Tulsi leaves or flowers at the feet of the Lord:

पूगि फल समायुक्तम् नागवल्लि दलैर्युतम्।

कर्पूर चूर्ण सम्युक्तम् ताम्बूलं प्रति गृह्यतां ॥

ताम्बूलं समर्पयामि॥

Show Aarti to the Lord accompanied by ringing of the bell

राजाधि-राजाय प्रसह्य-साहिने । नमो वयं वै-श्रवणाय कुर्महे ।

स मे कामा-न्काम-कामाय मह्यम् । कामेश्वरो वै-श्रवणो ददातु ।

कुबेराय वै-श्रवणाय । महाराजाय नमः ।

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात् ॥

सर्वोपचा-रार्थे कर्पूर-मंगळ-नीराजनं स-न्दर्शयामि ।

कर्पूर-नीराजनानंन्तरं आचमनीयं समर्पयामि ।

वेदोक्त मन्त्रपुष्पम् समर्पयामि ॥

सुवर्ण-पुष्पम् समर्पयामि ॥

सर्वोपचारान् समर्पयामि ॥

offer flowers or Tulsi saying :

ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभा ।

निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥

ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महागणपतिं प्रियताम् ॥

Prostrate before the Lord.

# ॥ गणपत्यथर्वशीर्षोपनिषत् ॥

ॐ भद्रं धदातु ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमा क्षभिर्यजत्राः ।
स्थिरैरङ्गैः स्तुष्टुवाꣳ सस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यर्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ अथगणपत्यथर्वशीर्षम् व्याख्यास्यामः ।

ॐ नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि ।
त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि ।
त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि ।
त्वं साक्षा-दात्मासि नित्यम् ॥ ऋतं वच्मि । सत्यं वच्मि ॥
अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् ।
अव धातारम् । अवानूचानमव शिष्यम् । अव पश्चात्तात् ।
अव पुरस्तात् । अवोत्तरात्तात् । अव दक्षिणात्तात् ।

अव चोर्ध्वात्तात् । अवाधरात्तात् । सर्वतो मां पाहिपाहि समन्तात् ॥

त्वं वाङ्मयस्त्वं चिन्मयः । त्वमानन्दमयस्त्वं ब्रह्ममयः ।

त्वं सच्चिदानन्दा द्वितीयोऽसि । त्वं प्रत्यक्षं ब्रह्मासि ।

त्वं ज्ञानमयो विज्ञानमयोऽसि ॥

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।

सर्वं जगदिदं त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।

त्वं भूमिरापोऽनलोऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः ।

त्वं कालत्रयातीतः । त्वं मूलाधारस्थितोऽसि नित्यम् ।

त्वं शक्तित्रयात्मकः । त्वां योगिनो ध्यायन्ति नित्यम् ।

त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्व-मिन्द्रस्त्व-मग्निस्त्वं -

वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥

गणादिं पूर्वमुच्चार्य वर्णादिंस्तदनन्तरम् । अनुस्वारः परतरः ।

अर्धेन्दुलसितम् । तारेण ऋद्धम् । एतत्तव मनुस्वरूपम् ।

गकारः पूर्वरूपम् । अकारो मध्यमरूपम् ।
अनुस्वार श्चान्त्यरूपम् । बिन्दुरुत्तररूपम् । नादः सन्धानम् ।
सꣳहिता सन्धिः । सैषा गणेश विद्या । गणक ऋषिः ।
निचृद्गायत्री छन्दः । गणपतिर्देवता ।

ॐ गं गणपतये नमः ॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् ॥

एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम् ।
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ।
रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम् ।
रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम् ।
भक्तानु कम्पिनं देवं जगत्कारणमच्युतम् ।
आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम् ।
एवं ध्यायति यो नित्यं स योगी योगिनां वरः ॥
नमो व्रातपतये नमो गणपतये नमः प्रमथपतये

नमस्तेऽस्तु लम्बोदराय एकदन्ताय विघ्नविनाशिने

शिवसुताय श्रीवरदमूर्तये नमः ॥

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते ।

स सर्वविघ्नैर्न बाध्यते । स सर्वतः सुखमेधते ।

स पञ्चमहापापात् प्रमुच्यते ।

सायमधीयानो दिवसकृतं पापं नाशयति ।

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

सायं प्रातः प्रयुञ्जानो पापोऽ(अ)पापो भवति ।

सर्वत्राधीयानोऽपविघ्नो भवति । धर्मार्थकाममोक्षं च विन्दति ।

इदमथर्वशीर्षमशिष्याय न देयम् ।

यो यदि मोहाद् दास्यति । स पापीयान् भवति ।

सहस्रावर्तनाद्यं यं काममधीते । तं तमनेन साधयेत् ॥

अनेन गणपतिमभिषिञ्चति । स वाग्मी भवति ।

चतुर्थ्यामनश्नन् जपति । स विद्यावान् भवति ।

इत्यथर्वणवाक्यम् । ब्रह्माद्यावरणं विद्यात् । नबिभेति कदाचनेति ॥

यो दूर्वाङ्कुरैर्यजति । स वैश्रवणोपमो भवति । यो लाजैर्यजति ।

स यशोवान् भवति । स मेधावान् भवति ।

यो मोदकसहस्रेण यजति । स वाञ्छित फलमवाप्नोति ।

यः साज्य समिद्भिर्यजति । स सर्वं लभते स सर्वं लभते ॥

अष्टौ ब्राह्मणान् सम्यग् ग्राहयित्वा । सूर्यवर्चस्वी भवति ।

सूर्यग्रहे महानद्यां प्रतिमासन्निधौ वा जप्त्वा ।

सिद्धमन्त्रो भवति । महाविघ्नात् प्रमुच्यते ।

महादोषात् प्रमुच्यते । महाप्रत्यवायात् प्रमुच्यते ।

महापापात् प्रमुच्यते । स सर्वविद्भवति स सर्वविद्भवति ।

य एवं वेद । इत्युपनिषत् ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं धदातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# ॥ वरुणसूक्तम् ॥

उदुत्तमं वरुण-पाशमस्म-दवाधमं विमध्यमꣳ श्रथाय ।
अथा वय-मादित्य-व्रते तवानागसो अदितये स्याम ।
अस्तभ्ना-द्या-मृषभो अन्तरिक्ष-ममिमीत वरिमाणं पृथिव्या
आसीद्-द्विश्वा भुवनानि सम्राड्-विश्वेत्तानि वरुणस्य व्रतानि ।
यत्किञ्चेदम् वरुणदैव्ये जनेऽभिद्रोहं मनुष्या-श्चरामसि ।
अचित्ती-यत्तव धर्मा युयोपिम मा नस्तस्मा-देनसो देव रीरिषः ॥
कितवासो यद्रि-रिपु-र्न दीवि यद्वाघा सत्य-मुतयन्न विद्म ।
सर्वा ता विष्य शिथिरेव देवा था ते स्याम वरुण-प्रियासः ॥
अव ते हेडो वरुण नमो-भिरव-यज्ञे-भिरीमहे हविर्भिः ।
क्षयन्नस्मभ्य-मसुर-प्रचेतो राजन्नेनाꣳसि-शिश्रथः कृतानि ॥
तत्वायामि ब्रह्मणा वन्दमान-स्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्रमोषीः ॥

## ॥ पवमान सूक्तम् ॥

हिरण्यवर्णाः श्शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भम् दधिरे विरूपास्तान आपश्शश्ँ स्योना भवन्तु ॥
यासाꣳ राजा वरुणो याति मध्ये सत्यानृते अवपश्यम् जनानाम् ।
मधुश्चुत श्शुचयो याः पावका स्तान आपश्शश्ँ स्योना भवन्तु ॥
यासाम् देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीम् पयसोन्दन्ति शुक्रा स्तान आपश्शश्ँ स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यताप श्शिवया तनुवोप स्पृशत त्वचम् मे ।
सर्वाꣳ अग्नीꣳ रप्सुषदो हुवो वो मयि वर्चो बलमोजो निधत्त ॥
पवमानस्सुवर्जनः । पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मा । पुनन्तु मा देवजनाः ।
पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः ।
जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा ।
शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूꣳ रनु ।
यत्ते पवित्रमर्चिषि । अग्ने विततमन्तरा ।

ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवितः । पवित्रेण सवेन च ।
इदं ब्रह्म पुनीमहे । वैश्वदेवी पुनती देव्यागात् ।
यस्यै बह्वीस्तनुवो वीत पृष्ठाः । तया मदन्तः सधमाद्येषु ।
वयꣳ स्याम पतयो रयीणाम् । वैश्वानरो रश्मिभिर्मा पुनातु ।
वातः प्राणेने षिरो मयो भूः । ध्यावा पृथिवी पयसा पयोभिः ।
ऋतावरी यज्ञिये मा पुनीताम् । बृहद्भिः सवितस्तृभिः ।
वर्षिष्ठै र्देवमन्मभिः । अग्ने दक्षैः पुनाहि मा ।
येन देवा अपुनत । येनापो दिव्यंकशः ।
तेन दिव्येन ब्रह्मणा । इदं ब्रम्ह पुनीमहे ।
यः पावमानीरध्येति । ऋषिभि स्सम्भृतꣳ रसम् ।
सर्वꣳ स पूत मश्नाति । स्वदितम् मातरिश्वना ।
पावमानीर्यो अध्येति । ऋषिभिस्सम्भृतꣳ रसम् ।
तस्मै सरस्वती दुहे । क्षीरꣳ सर्पि र्मधू दकम् ।
पावमानी स्स्वस्तयनीः । सुदुघाहि पयस्वतीः ।

ऋषिभि स्सम्भृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्।

पावमानी र्दिशन्तु नः। इमं लोक मथो अमुम्।

कामान्थ्समर्धयन्तु नः। देवी र्देवैः समा भृताः।

पावमानीस्स्वस्त्ययनीः। सुदुघाहि घृतश्चुतः।

ऋषिभि स्संभृतो रसः। ब्राह्मणेष्वमृतꣳ हितम्।

येन देवाः पवित्रेण। आत्मानं पुनते सदा।

तेन सहस्रधारेण। पावमान्यः पुनन्तु मा।

प्राजापत्यम् पवित्रम्। शतोध्यामꣳ हिरण्मयम्।

तेन ब्रह्म विदो वयम्। पूतं ब्रह्म पुनीमहे।

इन्द्रस्सुनीती सहमा पुनातु। सोम स्स्वस्त्या वरुण स्समीच्या।

यमो राजा प्रमृणाभिः पुनातु मा। जातवेदा मोर्जयन्त्या पुनातु।

भूर्भुवस्सुवः। तच्छं योरावृणीमहे। गातुं यज्ञाय।

गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तुनः। स्वस्ति र्मानुषेभ्यः।

ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।

ॐ शान्तिश्शान्तिश्शान्तिः।

# ॥ पुरुष सूक्तं ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा । अत्यतिष्ठ-द्दशाङ्गुलम् ।
पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्व-स्येशानः । यदन्नेना-तिरोहति । एतावानस्य महिमा ।
अतो ज्यायाꣳश्च पूरुषः । पादोऽस्य विश्वा भूतानि ।
त्रिपादस्या-मृतं दिवि । त्रिपा-दूर्ध्व उदैत्पुरुषः ।
पादोऽस्येहाऽऽभवात्पुनः । ततो विश्वङ्-व्यक्रामत् ।
साशनानशने अभि । तस्मा-द्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्-भूमिमथो पुरः । यत्पुरुषेण हविषा ।
देवा यज्ञ-मतन्वत । वसन्तो अस्या-सीदाज्यम् ।
ग्रीष्म इध्मः शर-द्धविः । सप्तास्यासन्-परिधयः ।
त्रिः सप्त समिधः कृताः । देवा यद्य-ज्ञं तन्वानाः ।
अबध्न-न्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जात-मग्रतः ।
तेन देवा अयजन्त । साध्या ऋषय-श्च ये । तस्माद्य-ज्ञा-त्सर्वहुतः ।

संभृतं पृषदाज्यम् । पशूꣳस्ताꣳश्चक्रे वायव्यान् ।
आरण्यान्ग्राम्याश्च ये । तस्माद्य-ज्ञा-त्सर्वहुतः ।
ऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्मात् ।
यजुस्तस्मा-दजायत । तस्मा-दश्वा अजायन्त ।
ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् ।
तस्मा-ज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।
ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायत ।
चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।
मुखादिन्द्र-श्चाग्निश्च । प्राणा-द्वायु-रजायत ।
नाभ्या आसी-दन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमि-र्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ।
वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते ।

धाता पुरस्ता-द्यमुदाजहार । शक्रः प्रविद्वा-न्प्रदिशश्च-तस्रः ।
तमेवं विद्वा-नमृत इह भवति । नान्यः पन्था अयनाय विद्यते ।
यज्ञेन यज्ञमय-जन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ।
॥ ॐ नमो नारायणाय ॥
अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि ।
तस्य त्वष्टा विदध-द्रूपमेति । तत्पुरुषस्य विश्व-माजानमग्रे ।
वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् ।
तमेवं विद्वा-नमृत इह भवति । नान्यः पन्था विद्यतेयऽनाय ।
प्रजापति-श्चरति गर्भे अन्तः । अजायमनो बहुधा विजायते ।
तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेदसः ।
यो देवेभ्य आतपति । यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो-जातः । नमो रुचाय ब्राह्मये ।
रुचं ब्राह्मम् जनयन्तः । देवा अग्रे तदब्रुवन् ।
यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे ।

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् ।
अश्विनौ व्यात्तम् । इष्टम् मनिषाण ।
अमुं मनिषाण । सर्वम् मनिषाण ।

## ॥ महा नारायणं ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्व-शम्भुवम् ।
विश्वं नारायणं देव-मक्षरं परमं पदम् ।
विश्वतः परमा-न्नित्यं विश्वं नारायणꣳ हरिम् ।
विश्वमे-वेदं पुरुष-स्तद्विश्व-मुपजीवति ।
पतिं विश्व-स्यात्मेश्वरꣳ शाश्वतꣳ शिव-मच्युतम् ।
नारायणं महाज्ञेयं विश्वात्मानं परायणम् ।
नारायण-परो ज्योति-रात्मा नारायणः परः ।
नारायण परं ब्रह्म तत्वं नारायणः परः ।
नारायण-परो ध्याता ध्यानम् नारायणः परः ।
यच्च किञ्चि-ज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥
अन्त-र्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।

अनन्त-मव्ययं कविं॒ समुद्रेऽन्तं विश्व-शम्भुवम् ।
पद्मकोश प्रतीकाशं॒ हृदयं चाप्यधो-मुखम् ।
अधो निष्टया वितस्यान्ते नाभ्या-मुपरि तिष्ठति ।
ज्वालमाला-कुलं भाति विश्व-स्याय तनं महत् ।
सन्ततं॒ शिलाभिस्तु लम्बत्या कोश-सन्निभम् ।
तस्यान्ते सुषिरं॒ सूक्ष्मं तस्मिन् त्सर्वं प्रतिष्ठितम् ।
तस्य मध्ये महानग्नि र्विश्वार्चि र्विश्वतोमुखः ।
सोऽग्रभुग्वि भजन्तिष्ठ-न्नाहार-मजरः कविः ।
तिर्यगूर्ध्व मध-श्शायी रश्मय-स्तस्य सन्तता ।
सन्ता-पयति स्वं देह-मापाद तलमस्तकः ।
तस्य मध्ये वह्नि-शिखा अणीयोर्ध्वा व्यवस्थितः ।
नीलतो यद-मध्यस्था द्विद्युल्लेखेव भास्वरा ।
नीवार-शूकवत्तन्वी पीता भास्व-त्यणूपमा ।
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ।

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।
ॐ शान्ति श्शान्ति श्शान्तिः ।

## ॥ ब्रह्मः सूक्तम् ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ता द्विसीमत स्सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठा सतश्च योनि-मसतश्च विवः ।
पिता विराजा-मृषभो रयीणा-मन्तरिक्षं विश्वरूप आविवेश ।
तमर्कै-रभ्यर्चन्ति वत्सं ब्रह्म सन्तं ब्रह्मणा वर्धयन्तः ।
ब्रह्म देवा-नजन यद् ब्रह्म विश्वमिदं जगत् ।
ब्रह्मणः, क्षत्र-न्निर्मितं ब्रह्म ब्राह्मण आत्मना ।
अन्तरस्मि-न्निमे लोका अन्तर्विश्व-मिदं जगत् ।
ब्रह्मैव भूतानां ज्येष्ठं तेन कोऽर्हति स्पर्धितुम् ।
ब्रह्मन्देवा स्त्रय-स्त्रिꣳ शद् ब्रह्म-न्निन्द्र प्रजापती ।
ब्रह्मन् , ह विश्वा भूतानि नावीवान्तः समाहिता ।

चतस्र आशाः प्रचरन्त्वग्नय इम न्नो यज्ञ-न्नयतु प्रजानन्।
घृतं पिन्व-न्नजरꣳ सुवीरं ब्रह्म समिद्-भव त्याहुतीनाम्।
ॐ शान्ति श्शान्ति श्शान्तिः।

## ॥ विष्णुः सूक्तम् ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि
यो अस्क भाय-दुत्तरꣳ सधस्थं विचक्रमाण स्त्रेधो-रुगायः॥
तदस्य प्रिय-मभि पाथो अश्याम्। नरो यत्र देवयवो मदन्ति।
उरुक्रमस्य स हि बन्धुरित्था। विष्णोः पदे परमे मध्व उत्सः।
प्रतद्विष्णु-स्स्तवते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः।
यस्यो-रुषु त्रिषु विक्रमणेषु। अधिक्षियन्ति भुवनानि विश्वा।
परो मात्रया तनुवा वृधान। न ते महित्व-मन्वश्नुवन्ति॥
उभे ते विद्म रजसि पृथिव्या विष्णो देवत्वम्। परमस्य विथ्से।
विचक्रमे पृथिवी-मेष एताम्। क्षेत्राय विष्णु-र्मनुषे दशस्यन्।
ध्रुवासो अस्य कीरयो जनासः। उरुक्षितिꣳ सुजनि-माचकार।
त्रिर्देवः पृथिवीमेष एताम्। विचक्रमे शतर्चसं महित्वा।
प्रविष्णु-रस्तु तव-सस्त-वीयान्। त्वेषꣳ ह्यस्य स्थविरस्य नाम॥
ॐ शान्ति श्शान्ति श्शान्तिः।

## ॥ रुद्रः सूक्तम् ॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्-भ्य स्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥
स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीम-मुपहत्नु-मुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्म-न्निवपन्तु सेनाः ॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुध-न्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥
अर्हन्बिभर्षि सायकानि धन्व । अर्हन्निष्कं यजतं विश्वरूपम् ।
अर्हन्निदं दयसे विश्वमभ्भुवं । न वा ओजीयो रुद्र त्वदस्ति ॥
त्वमग्ने रुद्रो असुरो महो दिवस्त्वꣳ शर्धो मारुतं पृक्ष ईशिषे ।
त्वं वातै ररुणैर् यासि शंगयस्त्वं पूषा विधतः पासि नुत्मना ॥
आ वो राजान मध्व-रस्य रुद्रꣳ होतारꣳ सत्य यजꣳ रोदस्योः ।
अग्निं पुरातन यित्नोर-चित्ता द्धिरण्य रूप मवसे कृणुध्वम् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ।

# ॥ दुर्गा सूक्तम् ॥

जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतर सितरसे नमः ॥
अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्ति भिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥
विश्वानि नो दुर्गहा जातवेदः सिन्धु-न्ननावा दुरिताऽतिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥
पृतना जितꣳ सहमान-मुग्रमग्निꣳ हुवेम परमाथ्स-धस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिता-त्यग्निः ॥
प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वाञ्चाग्ने तनुवं पिप्रयस्वा स्मभ्यं च सौभगमाय-जस्व ॥
गोभिर्जुष्ट-मयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम ।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात् ॥ ॥
ॐ शान्ति श्शान्ति श्शान्तिः ।

## ॥श्री सूक्तम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी-र्जुषताम् ॥
कां-सोस्मितां हिरण्यप्राकारा-मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहो-पह्वये श्रियम् ॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टा-मुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽ(अ)लक्ष्मीर्मे नश्यतां त्वां वृणे ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पति-स्तव वृक्षोऽथ बिल्वः ।

तस्य फलानि तपसानुदन्तु-मायान्त-रायाश्च बाह्या अलक्ष्मीः ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्-कीर्ति-मृद्धिं ददातु मे ॥

क्षुत्पिपासा-मलां ज्येष्ठा-मलक्ष्मीं नाशयाम्यहम् ।

अभूति-मस-मृद्धिं च सर्वां निर्णुद मे गृहात् ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीꣳ सर्व भूता नां तामिहो-पह्वये श्रियम् ॥

मनसः काम-माकूतिं वाचः सत्य-मशीमहि ।

पशूनां रूप-मन्नस्य मयि श्रीः श्रयतां यशः ॥

कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।

श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥

आपः सृजन्तु स्निग्धानि चिक्लीत-वसमे गृहे ।

निच-देवीं मातरꣳ श्रियं वासय मे कुले ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
तां म आवह जातवेदो लक्ष्मी-मनप-गामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो-दास्योऽश्वान् विन्देयं पुरुषानहम् ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्म-दलायताक्षि ।
विश्वप्रिये विष्णु-मनोनुकूले त्वत्पाद-पद्मं मयि संन्निधत्स्व ॥
महादेव्यै च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥
श्री वर्चस्व मायुष्य मारोग्य माविधात् शोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्र लाभं शत-संवत्सरं दीर्घमायुः ॥
ॐ शान्ति श्शान्ति श्शान्तिः ।

## ॥ भूः सूक्तम् ॥

भूमिर्भूम्ना द्यौ-र्वरिणाऽन्तरिक्षं महित्वा ।
उपस्थे ते देव्यदि-तेऽग्नि-मन्नाद मन्ना-द्यायादधे ॥

आऽयङ्गौः पृश्निरक्रमी दसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः ॥

त्रिꣳ शद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः ॥

अस्य प्राणादपान-त्यन्त-श्चरति रोचना । व्यख्यन् महिषः सुवः ॥

यत्त्वा क्रुद्धः परोवप मन्युना य दवर्त्या ।

सुकल्पमग्ने तत्तव पुनस्त्वोद्दी-पयामसि ॥

यत्ते मन्युपरो-प्तस्य पृथिवी-मनुदध्वसे ।

आदित्या विश्वे त-द्देवा वसवश्च समाभरन्न् ॥

मनो ज्योति-र्जुषता माज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ।

बृहस्पति स्तनुता-मिमन्नो विश्वे देवा इह मादयन्ताम् ॥

सप्तते अग्ने समिधः सप्तजिह्वाः सप्तऋषयः सप्तधाम प्रियाणि ।

सप्त होत्राः सप्त धात्वा यजन्ति सप्त योनीरा पृणस्वा घृतेन ॥

पुनरूर्जा निवर्तस्व पुनरग्न इहाऽऽयुषा । पुनर्नः पाहि विश्वतः ॥

सहरंय्या निवर्त-स्वाऽग्ने पिन्वस्व धारया ।

विश्वप्स्निया विश्वतस्परि ॥

लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु
केतः सकेतः सुकेतस्ते न आदित्या आज्यं जुषाणा वियन्तु
विवस्वाꣳअदिति देव-जूति-स्तेन आदित्या आज्यं जुषाणा वियन्तु ॥
ॐ शान्ति श्शान्ति श्शान्तिः ।

## ॥ आयुष्य सूक्तम् ॥

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवः स-न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥
विभ्राजमानः सरिरस्य मध्या द्रोचमानो घर्मरुचिर्य आगात् ।
स मृत्युपाशा नपनुद्य घोरा निहायुषेणो घृतमत्तु देवः ॥
ब्रह्म ज्योति ब्रह्म पत्नीषु गर्भं यमा दधात् पुरु रूपं जयंतम् ।
सुवर्ण रंभ ग्रह मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥
श्रियं लक्ष्मी मौबला मंबिकां गां षष्ठीं च यामिंद्र सेने-त्युदाहुः ।
तां विद्यां ब्रह्मयोनिꣳ सरूपा मिहायुषे तर्पयामो घृतेन ॥
दाक्षायण्यः सर्व योन्यः स योन्यः सहस्रशो विश्वरूपा विरूपाः ।

ससूनवः सपतयः सयूथ्या आयुषेणो घृतमिदं जुषंताम् ॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नंतु वीरान् ।

तेभ्यो जुहोमि बहुधा घृतेन मानः प्रजाꣳ रीरिषो मोत वीरान् ॥

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।

यमप्येति  भुवनꣳ सांपराये स नो हवि-र्घृत मिहायुषेत्तु देवः ॥

वसून् रुद्रा नादित्यान् मरुतोऽथ साध्यान्

ऋभून् यक्षान् गंधर्वाꣳश्च पित्रूꣳश्च विश्वान् ।

भृगून् सर्पाꣳ-श्चां-गिरसोऽथ सर्वान्

घृतꣳ हुत्वा स्वायुष्या महयाम शश्वत् ॥

विष्णो त्वं-नो अंत-मः शर्मयच्छ सहंत्य ।

प्रतेधारा मधु-श्चुत उथ्सं दुह्रते अक्षितम् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ।

# ॥ मेधासूक्तम् ॥

मेधादेवी जुषमाणा न आगा-द्विश्वाची भद्रा सुमनस्य-माना ।
त्वया जुष्टा जुषमाणा दुरुक्तान् बृहद्वदेम विदथे सुवीराः ।

त्वया जुष्ट ऋषि-र्भवति देवि त्वया ब्रह्माऽऽगतश्री-रुत त्वया ।
त्वया जुष्ट श्चित्रं विन्दते वसु सानो जुषस्व द्रविणो न मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विना-बुभा-वाधत्तां पुष्कर-स्रजा ।

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताꣳ स्वाहा ॥

आमां मेधा सुरभि-र्विश्व-रूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ।

मयि मेधां मयि प्रजां मय्यग्नि-स्तेजो दधातु

मयि मेधां मयि प्रजां मयी-न्द्र इन्द्रियं दधातु
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।

ॐ महादेव्यै च विद्महे ब्रह्मपत्नी च धीमहि । तन्नो वाणी प्रचोदयात् ॥
ॐ हंस हंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयात् ।

## ॥ ऐकमत्य सूक्तम् ॥

सं समिद्युॅ-वसे वृष-न्नग्ने विश्वा न्यर्य-आ ।
इड-स्पदे समिध्यसे स नो वसून्या भार ॥

सं-गच्छध्वं सं-वादध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासाते ॥

समानो मन्त्रः समीतिः समानी सामानं मनः सह चित्तमेषाम् ।
समानं मन्त्रा-मभि मन्त्रये वः समानेना वो हविषा जुहोमि ॥

समानी व आकूतिः समाना हृदायानि वः ।
समान मस्तु वो मनो यथा वः सु-सहासाति ॥

# ॥ स्वस्ति सूक्तं ॥

स्वस्ति नो मिमीता-मश्विना भगः स्वस्ति देव्य-दि॰तिर-नर्वण॰ः ।
स्वस्ति पूषा असु॰रो दधातु नः स्वस्ति द्यावा पृथिवी सु॰-चेतुना ॥
स्वस्तये वायु-मुप ब्रवा-महै सोमं स्वस्ति भुव॰नस्य यस्पति॰ः ।
बृहस्पतिं सर्व॰-गणं स्वस्त-ये स्वस्त-य॰ आदित्यासो भवन्तु नः ॥
विश्वे देवा नो अद्या स्वस्तये वैश्वा-नरो वसु॰-रग्निः स्वस्तये ।
देवा अ॰वन्तृ-भवः स्वस्त-ये स्वस्ति नो रुद्रः पात्वं-ह॰सः ॥
स्वस्ति मित्रा-वरुणा स्वस्ति पथ्ये रेवति ।
स्वस्ति न इन्द्र-श्चाग्निश्च स्वस्ति नो अदिते कृधि ॥
स्वस्ति पन्था-मनु॰चरेम सूर्याचन्द्र मसा-विव ।
पुन-र्ददता-घ्न॰ता जानता संग॰मे-महि ॥
स्वस्त्य-यनं तार्क्ष्य-मरिष्ट-नेमिं महद्-भूतं वायसं देवतानां ।
असु-रघ्न-मिन्द्र॰-सखं समत्स्यु॰ बृह-द्यशो नाव॰-मिवा-रु॰हेम ॥
अं-होमुच॰-माङगिरसं गयं च स्वस्त्या-त्रेयं मन॰सा च तार्क्ष्यं ।
प्रय॰त-पाणिः शरणं प्रपद्ये स्वस्ति संबा-धेष्व-भ॰यं नो अस्तु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

# । नवग्रह नमस्कारम् ॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

ॐ भूः ।ॐ भुवः ।ॐ स्वः ।ॐ महः ।ॐ जनः ।
ॐ तपः ।ॐ सत्यम् । ॐ तत्सवितुर्वरेण्यं ।
भर्गोदेवस्य धीमही । धियो यो नः प्रचोदयात् ॥
ॐ आपो-ज्योति रसो-मृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीथ्यर्थं
आदित्यादि नवग्रह नमस्कारान् करिष्ये ॥

ॐ आसत्येन रजसा वर्तमानो निवेशय-न्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेनाऽऽदेवो याति भुवना विपश्यन् ।
अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ।
येषामीशे पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् ।
निष्क्रीतोऽयं यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥

**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते आदित्याय नमः ॥**

ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

अपाᳪं रेताᳪं सि जिन्वति ।

स्योना पृथिवि भवाऽनृक्षरा निवेशनि । यच्छानश्शर्म सप्रथाः ।

क्षेत्रस्य पतिना वयᳪं हिते नेव जयामसि ।

गामश्वं पोषयित्न्वा स नो मृडातीदृशे ॥

**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते अङ्गारकाय नमः ॥**

ॐ प्रवश्शुक्राय भानवे भरध्वᳪं हव्यं मतिं चाग्नये सुपूतम् ।

यो दैव्यानि मानुषा जनूᳪं ष्यन्त-र्विश्वानि विद्म ना जिगाति ।

इन्द्राणीमासु नारिषु सुपत्नी महमश्रवम् ।

न ह्यस्या अपरंचन जरसा मरते पतिः ।

इन्द्रं वो विश्व-तस्परि हवामहे जनेभ्यः । अस्माक-मस्तु केवलः ॥

**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते शुक्राय नमः ॥**

ॐ आप्याय-स्व-समेतु ते विश्वत-स्सोम वृष्णियम् ।

भवा वाजस्य संगथे । अप्सुमे सोमो अब्रवी-दन्तर्विश्वानि भेषजा ।

अग्निञ्च विश्व-शंभुव-मापश्च विश्व भेषजीः ।

गौरी मिमाय सलिलानि तक्ष-त्येकपदी द्विपदी सा चतुष्पदी ।

अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥
**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते सोमाय नमः ॥**
ॐ उद् -बुध्य-स्वाग्ने प्रतिजा-गृह्येन-मिष्टापूर्ते सꣳसृजेथा-मयञ्च ।
पुनः कृण्वꣳस्त्वा पितरं युवान-मन्वाताꣳसी-त्वयि तन्तुमेतम् ।
इदं विष्णु-र्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाꣳ सुरे ।
विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णो-श्श्नप्त्रेस्थो
विष्णो-स्स्यूरसि विष्णो-र्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ।
**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते बुधाय नमः ॥**
ॐ बृहस्पते अतियदर्यो अर्हाद्-द्युमद्विभाति क्रतु-मज्जनेषु ।
यद्दिदय च्चवसर्त प्रजात तदस्मासु द्रविणन्धेहि चित्रम् ।
इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिब-स्सुतस्य ।
तव प्रणीती तव शूरशर्म-न्नाविवासन्ति कवयस्सु-यज्ञाः ।
ब्रह्मजज्ञानं प्रथमं पुरस्ता-द्विसीमत-स्सुरुचो वेन आवः ।
सबुध्निया उपमा अस्य विष्ठाः स्सतश्च योनि-मसतश्च विवः ॥
**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते बृहस्पतये नमः ॥**

ॐ शन्नो देवी-रभिष्टय आपो भवन्तु पीतये । शंयोरभिस्त्र-वन्तु नः ।
प्रजापते न त्वदेता-न्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुम-स्तन्नो अस्तु वयँस्याम पतयो रयीणाम् ।
इमं यम-प्रस्तर-माहि सीदाऽङ्गिरोभिः पितृभि स्संविदानः ।
आत्वा मत्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥
**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते शनैश्चराय नमः ॥**
ॐ कया नश्चित्र आभुवदूती सदावृध-स्सखा । कया शचिच्छ्ठया वृता ।
आऽयज्ञैः पृश्निरक्रमी-दसनन्मातरं पुनः । पितरञ्च प्रयन्त्सुवः ।
यत्ते देवी निर्ऋतिरा-बबन्ध दाम ग्रीवा-स्वविचर्त्यम् ।
इदन्ते तद्विष्या-म्यायुषो न-मध्या-दथाजीवः पितुमद्धि प्रमुक्तः ॥
**ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते राहवे नमः ॥**
ॐ केतुंकृण्वन्न-केतवे पेशो मर्या अपेशसे । समुषद्भि-रजायथाः ।
ब्रह्मा देवानां पदवीः कवीना-मृषिर्विप्राणां महिषो मृगाणाम् ।
श्येनो-गृध्राणाँस्वधि-तिर्वनानाँ सोमः पवित्रमत्येति रेभन् ।
सचित्र चित्रं चितयन्त-मस्मे चित्रक्षत्र चित्रतमं वयोधाम् ।

चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्रचन्द्राभि-र्गृणते युवस्व ॥

**ॐ अधिदेवता प्रत्यधिदेवता सहितेभ्यो भगवद्भ्यः केतुभ्यो नमः ॥**

**ॐ आदित्यादि नवग्रह देवताभ्यो नमो नमः ॥**

आयुष्टे विश्वतो दध-दय-मग्निर् वरेण्यः ।

पुनस्ते प्राण आऽयति परा यक्ष्मꣳ सुवामि ते ॥

आयुर्दा अग्ने हविषो जुषाणो घृत-प्रतीको घृतयो-निरेधि ।

घृतं पीत्वा मधु चारु गव्यं पितेव पुत्र-मभि रक्षता-दिमम् ॥

**ॐ आयु र्देवतायै नमः ॥**

अप मृत्यु-मपक्षुध-म-पेतः शपथं जहि ।

अधा नो अग्न आवह रायस्पोषꣳ सहस्रिणम् ॥

ये ते सहस्र-मयुतं पाशा मृत्यो मर्त्याय हन्तवे ।

तान् यज्ञस्य मायया सर्वा नव यजामहे ॥

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥

**ॐ अपमृत्यु हर देवतायै नमः ॥**

इदं नवग्रह प्रीतिं कामयमानस्तुभ्यमहं संप्रददे । ओं तत्सत् ।

# । सूर्य नमस्कारम् ॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

ॐ भूः ।ॐ भुवः ।ॐ स्वः ।ॐ महः ।ॐ जनः ।ॐ तपः ।ॐ सत्यम् ।

ॐ तत्सवितुर्वरेण्यं । भर्गोदेवस्य धीमही । धियो यो नः प्रचोदयात् ॥

ॐ आपो-ज्योति रसो-मृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं अस्माकं

सह कुटुम्बानां क्षेम-स्थैर्य-वीर्य-विजय-आयु-रारोग्य-ऐश्वर्याणा-

मभि-वृद्ध्यर्थं छाया-संज्ञा-समेत श्री सूर्यनारायण प्रसाद सिध्यर्थं

श्री सूर्यनारायण प्रसादेन अ-रोग-दृढ-गात्रता सिध्यर्थं मम

शरीरे आरोग्यता प्राप्त्यर्थं श्री सूर्यनमस्कारान् करिष्ये ॥

॥ ध्यानम् ॥

ध्याये-त्सूर्य-मनन्त-शक्ति-किरणं तेजोऽमलं भास्करं

भक्ताना-मभय-प्रदं दिनकरं ज्योति-र्मयं शङ्करम् ।

आदित्यं जगदीश-मच्युत-मजं त्रैलोक्य-चूडामणिं

भक्ता-भीष्ट-वर-प्रदं दिनमणिं मार्ताण्ड-माद्यं शुभम् ॥

द्विभुजं पद्महस्तं च वरदं मकुटान्वितम् ।

ध्याये-द्दिवाकरं देवं सर्वाभीष्ट-प्रदायकम् ॥

# ॥अरुणप्रश्नः ॥

## ॥ तैत्तिरीयारण्यकम् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमा क्षभिर्यजत्राः ।
स्थिरैरङ्गैः स्तुष्टुवाꣳस स्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमा क्षभिर्यजत्राः ।
स्थिरैरङ्गैः स्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
आप-मापा-मपः सर्वाः । अस्मा-दस्मा-दितोऽमुतः ॥ १ ॥

अग्नि-र्वायुश्च सूर्यश्च । सह संचस्कर-र्द्धिया ।
वाय्व-श्वा रश्मि-पतयः । मरीच्या-त्मानो अद्रु-हः ।
देवी-र्भुवन-सूवरीः । पुत्र-वत्वाय मे सुत ।

महा-नाम्नी-र्महा-मानाः । महसो मह-सस्स्वः ।
देवीः पर्जन्य-सूवरीः । पुत्र-वत्वाय मे सुत ॥ २ ॥
अपा-श्न्युष्णि-मपा रक्षः । अपा-श्न्युष्णि-मपार-घम् ।
अपा-घ्रामप चावर्तिम् । अप-देवी-रितो हित ।
वज्रं देवीर-जीताꣳश्च । भुवनं देव-सूवरीः ।
आदित्या-न-दितिं देवीम् । योनिनोर्ध्व-मुदीषत ।
शिवान-श्शन्तमा भवन्तु । दिव्या आप ओषधयः ।
सुमृडीका सरस्वती । मा ते व्योम संदृशि ॥ ३ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (1)

स्मृतिः प्रत्यक्ष-मैतिह्यम् । अनुमानश्च-तुष्टयम् ।
एतै-रादित्य-मण्डलम् । सर्वै-रेव विधास्यते ।
सूर्यो मरीचिमा-दत्ते । सर्वस्माद्-भुवना-दधि ।
तस्याः पाक-विशेषेण । स्मृतं काल-विशेषणम् ।
न-दीव प्रभवात्का-चित् । अक्षय्या-त्स्यन्दते यथा ॥ ४ ॥

तान्नद्योऽभिसमा-यन्ति। सोरु-स्सती न निवर्तते।
एवं-न्नाना-समुत्थानाः। काला-स्संवत्सरꣳ श्रिताः।
अणु-शश्च मह-शश्च। सर्वे समव-यन्त्रितम्।
सतै-स्सर्वै-स्समा-विष्टः। ऊरु-स्सन्न निवर्तते ।
अधि-संवत्सरं विद्यात्। तदेव लक्षणे॥ ५॥
अणु-भिश्च महद्-भिश्च। समा-रूढः प्रदृश्यते।
संवत्सरः प्रत्य-क्षेण। नाधि-सत्वः प्र-दृश्यते।
पटरो विक्लिधः पिङ्गः। एतद्-वरुण-लक्षणम्।
यत्रै-तदुप-दृश्यते। सहस्रं तत्र नीयते।
एकꣳ-हि शिरो नाना मुखे। कृत्स्नम् त-दृतु-लक्षणम्॥ ६॥
उभ-यत-स्सप्ते-न्द्रियाणि। जल्पितं त्वेव दिह्यते।
शुक्ल-कृष्णे संवत्सरस्य। दक्षिण-वामयोः पार्श्वयोः।
तस्यैषा भवति। शुक्रं ते अन्य-द्यजतं-ते अन्यत्।
विषु-रूपे अहनी द्यौ-रिवासि।

विश्वा-हि माया अवसि स्वधावः ।

भद्रा ते पूष-न्निह रातिर-स्त्वति । नात्र भुवनम् । न पूषा ।

न पशवः । नादित्य-स्संवत्सर एव प्रत्यक्षेण प्रियतमं विद्यात् ।

एत-द्वै संवत्सरस्य प्रियतमꣳ रूपम् ।

योऽस्य महा-नर्थ उत्पतस्य-मानो भवति ।

इदं पुण्यं कुरुष्वेति । तमा-हरणं दद्यात् ॥ ७ ॥

| |
|---|
| श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।<br>ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (2) |

साकं-जानाꣳ सप्तथ-माहुरेक-जम् ।

षड्ड-द्यमा ऋषयो देवजा इति । तेषा-मिष्टानि विहितानि धामशः ।

स्थात्रे रेजन्ते विकृतानि रूपशः । को नु मर्या अमि-थितः ।

सखा सखाय-मब्रवीत् । जहाको अस्म दीषते ।

यस्ति-त्याज सखि-विदꣳ सखायम् ।

न तस्य वाच्यपि भागो अस्ति ।

यदीꣳ शृणोत्य-लकꣳ शृणोति ॥ ८ ॥

न हि प्रवेद सु-कृतस्य पन्था-मिति । ऋतु-र्ऋतुना नुद्यमानः ।
विनना-दाभि-धावः । षष्टिश्च त्रिꣳ शका वल्गाः ।
शुक्ल-कृष्णौ च षाष्टिकौ । सा-राग-वस्त्रै-र्जर-दक्षः ।
वसन्तो वसुभि-स्सह । संवत्सरस्य सवितुः ।
प्रैष-कृत्-प्रथमः स्मृतः । अमूना-दयते-त्यन्यान् ॥ ९ ॥
अमूꣳश्च परि-रक्षतः । एता वाचः प्रयु-ज्यन्ते ।
यत्रै-तदुप-दृश्यते । एत-देव विजानीयात् ।
प्रमाणं काल-पर्यये । विशेषणं तु वक्ष्यामः ।
ऋतूनां तन्नि-बोधत । शुक्ल-वासा रुद्र-गणः ।
ग्रीष्मेणाऽऽवर्तते सह । निज-हन् पृथिवीꣳ सर्वाम् ॥ १० ॥
ज्योतिषाऽप्रतिख्ये-न सः । विश्व-रूपाणि वासाꣳ सि ।
आदित्यानां निबोधत । संवत्सरीणं कर्म-फलम् ।
वर्षाभि-र्ददताꣳ सह । अ-दुःखो दुःख-चक्षु-रिव ।
तद्माऽऽपीत इव-दृश्यते । शीतेना-व्यथ-य-न्निव ।

रुरु-दक्ष इव-दृश्यते । ह्लादयते ज्वलत-श्चैव ।
शाम्य-तश्चा-स्य चक्षुषी । या वै प्रजा भ्रँ श्यन्ते ।
संवत्सरा-त्ता भ्रँ श्यन्ते । याः प्रति-तिष्ठन्ति ।
संवत्सरे ताः प्रति-तिष्ठन्ति । वर्षाभ्य इत्यर्थः ॥ ११ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (3)

अक्षि-दुःखो-त्थित-स्यैव । वि-प्रसन्ने कनी-निके ।
आङ्क्ते-चाद्-गणं नास्ति । ऋ-भूणां तन्नि-बोधत ।
कनका-भानि वासाँ सि । अह-तानि निबोधत ।
अन्न-म-श्नीत मृज्मीत । अहं वो जीवन-प्रदः ।
एता वाचः प्रयु-ज्यन्ते । शरद्य-त्रोप-दृश्यते ॥ १२ ॥

अभि-धून्वन्तोऽभि-घ्नन्त इव । वात-वन्तो मरुद्-गणाः ।
अमुतो जेतु-मिषु-मुख-मिव । सन्न-द्धा-स्सहद-दृशे-ह ।
अप-ध्वस्तै-र्वस्ति-वर्णै-रिव । विशिखासः कपर्दिनः ।

अक्रु-द्धस्य योत्स्य-मानस्य । क्रुद्ध-स्येव लोहिनी ।

हेमत-श्चक्षुषी विद्यात् । अक्ष्ण-योः, क्षिपणो-रिव ॥ १३ ॥

दुर्भिक्षं देव-लोकेषु । मनूना-मुदकं गृहे ।

एता वाचः प्रव-दन्तीः । वैद्युतो यान्ति शै-शिरीः ।

ता अग्निः पवमाना अन्वैक्षत । इह जीवि-काम-परिपश्यन् ।

त-स्यैषा भवति । इहे-हव-स्स्व-तपसः ।

मरुत-स्सूर्य-त्वचः । शर्म स-प्रथा आवृणे ॥ १४ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (4)

अति-ताम्राणि वासाꣳ सि । अष्टि-वज्रि-शतघ्नि च ।

विश्वे देवा वि-प्रहरन्ति । अग्नि-जिह्वा अ-सश्चत ।

नैव देवो न मर्त्यः । न राजा वरुणो विभुः ।

नाग्नि-र्नेन्द्रो न पवमानः । मातृ-क्कच्चन विद्यते ।

दिव्य-स्यैका धनु-रार्त्निः । पृथिव्या-मपरा श्रिता ॥ १५ ॥

तस्येन्द्रो वज्रि-रूपेण । धनुर्ज्याम-च्छिन-थ्स्वयम् ।
तदिन्द्र-धनुरित्य-ज्यम् । अभ्र-वर्णेषु चक्षते ।
एत-देव शंयोर्-बार्हस्प-त्यस्य । एतद्-रुद्रस्य धनुः ।
रुद्रस्य त्वेव धनु-रार्त्निः । शिर उत्पि-पेष ।
स प्रवर्ग्योऽभवत् । तस्मा-द्य स्स-प्रवर्ग्येण यज्ञेन यजते ।
रुद्रस्य स-शिरः प्रति-दधाति ।
नैनꣳ रुद्र आ-रुको भवति । य एवं वेद ॥ १६ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (5)

अत्यू-र्ध्वाक्षोऽतिर-श्चात् । शिशिरः प्र-दृश्यते ।
नैव रूपं न वासाꣳसि । न चक्षुः प्रति-दृश्यते ।
अन्योन्यं तु-न हिꣳस्रातः । स-तस्त -द्देव-लक्षणम् ।
लोहितोऽक्ष्णि शार-शीर्ष्णिः । सूर्यस्यो -दयनं प्रति ।
त्वं करोषि-न्य-ञ्जलिकाम् । त्वं करोषि निजा-नुकाम् ॥ १७ ॥

निजा-नुकामे-न्य-ञ्जलिका । अमी वाच-मुपा-सता-मिति ।
तस्मै सर्व ऋतवो नमन्ते । मर्यादा-करत्वा-त्प्र-पुरोधाम् ।
ब्राह्मण आप्नोति । य एवं वेद ।
स खलु संवत्सर एतै-स्सेनानी-भि-स्सह ।
इन्द्राय सर्वान्-कामा-न-भिवहति । स द्रप्सः । तस्यैषा भवति ॥ १८
अव-द्रप्सो अꣳ शुमतीम-तिष्ठत् । इयानः कृष्णो दशभि-स्सहस्त्रैः ।
आवर्त-मिन्द्रः शच्या धमन्तम् ।
उप-स्नुहितं नृमणा-मथद्रा-मिती ।
एतयै-वेन्द्रः सला-वृक्या सह । असुरान् परि-वृश्चति ।
पृथिव्यꣳ शुमती । तामन्-ववस्थितः संवत्सरो दिवं च ।
नैवं विदुषाऽऽचार्यान्ते-वासिनौ । अन्यो-न्यस्मै द्रुह्याताम् ।
यो द्रुह्यति । भ्रश्यते स्वर्गा-ल्लोकात् । इत्यृतु मण्डलानि ।
सूर्य-मण्डलान्या-ख्यायिका: ।अत ऊर्ध्वꣳसनिर्-वचनाः ॥१९

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (6)

आ-रोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषीमान् विभासः ।

ते अस्मै सर्वै दिवमा-तपन्ति । ऊर्जं दुहाना अनप-स्फुरन्त-इति ।

कश्यपोऽष्ट-मः । स महा-मेरुं न जहाति ।

तस्यैषा भवति । यत्ते शिल्पं-कश्यप रोचना-वत् ।

इन्द्रि-यावत्-पुष्कलं चित्रभानु ।

यस्मिन्-त्सूर्या अर्पिता-स्सप्त साकम् ॥ २० ॥

तस्मिन् राजा-न-मधि-विश्रयेम-मिति ।

ते अस्मै सर्वै कश्यपा-ज्ज्योति-र्लभन्ते ।

तान्-त्सोमः कश्यपा-दधि-निर्द्धमति । भ्रस्ता-कर्म-कृदि-वैवम् ।

प्राणो जीवा-नीन्द्रिय-जीवानि । सप्त शीर्षण्याः प्राणाः ।

सूर्या इत्या-चार्याः । अपश्य-महमे-तान्-त्सप्त सूर्या-निति ।

पञ्च-कर्णो वात्स्यायनः । सप्त-कर्णश्च प्लाक्षिः ॥ २१ ॥

आनु-श्रविक एव-नौ कश्यप-इति । उभौ वेद-यिते ।

न हि शेकु-मिव महा-मेरुं गन्तुम् ।

अपश्य-महमे-तत्-सूर्य-मण्डलं परि-वर्तमानम् ।
गार्ग्यः प्राण-त्रातः । गच्छन्त महा-मेरुम् ।
एकं चा-जहतम् । भ्राज-पटर-पतङ्गा निहने ।
तिष्ठन्ना-तपन्ति । तस्मा-दिह तप्त्रि-तपाः ॥ २२ ॥

अमुत्रे-तरे । तस्मा-दिहा-तप्त्रि-तपाः । तेषा-मेषा भवति ।
सप्त सूर्या दिव-मनु-प्रविष्टाः ।
ता-नन्वेति पथिभि-र्दक्षिणावान् ।
ते अस्मै सर्वे घृतमा-तपन्ति । ऊर्जं दुहाना अनप-स्फुरन्त इति ।
सप्त-र्त्विज-स्सूर्या इत्या-चार्याः । तेषा-मेषा भवति ।
सप्त दिशो नाना -सूर्याः ॥ २३ ॥
सप्त होतार ऋ-त्विजः । देवा आदित्या ये सप्त ।
तेभि-स्सोमा-भी-रक्षण इति । तदप्या-म्नायः ।
दिग्भ्राज ऋतून् करोति ।
एतयै-वावृता सहस्र-सूर्यताया इति वैशंपायनः ।

त-स्यैषा भवति । यद्-द्याव इन्द्र-ते शतꣳ शतं भूमीः ।

उत-स्युः । नत्वा वज्रिन् सहस्रꣳ सूर्याः ॥ २४ ॥

अनुन-जात-मष्ट रोदसी इति ।

नाना-लिङ्गत्वा-दृतूनां नाना-सूर्यत्वम् । अष्टौ तु व्यवसिता इति ।

सूर्य-मण्डला-न्यष्टात ऊर्ध्वम् । तेषा-मेषा भवति ।

चित्रं देवाना-मुदगाद्-नीकम् । चक्षुर्मित्रस्य वरुण-स्याग्नेः ।

आप्रा द्यावा -पृथिवी अन्तरिक्षम् ।

सूर्य आत्मा जगत-स्त-स्थुष-श्चेति ॥२५ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (7)

क्वे-दम-भ्रन्नि-विशते । क्वा-यꣳ संवत्सरो मिथः ।

क्वा-हः क्वेयम्-देव रात्री । क्व-मासा ऋत-वः श्रिताः ।

अर्द्ध-मासा मुहूर्ताः । निमेषा-स्त्रुटिभि-स्सह ।

क्वे-मा आपो निविशन्ते । यदीतो यान्ति संप्रति ।

काला अप्सु-निविशन्ते । आप-स्सूर्ये समाहिताः ॥ २६ ॥

अभ्राण्य-पः प्रप-द्यन्ते । विद्यु-त्सूर्ये समाहिता ।
अन-वर्णे इमे भूमी । इयं चाऽसौ च रोदसि ।
किꣳ-स्वि-दत्रा-न्तरा भूतम् । ये-नेमे विधृते उभे ।
विष्णुना विधृते भूमी । इति वत्स-स्य वेदना ।
इरावती धेनुमती हि भूतम् । सूय-वसिनी मनुषे दशस्ये ॥ २७ ॥

व्यष्ट-भ्नाद्-रोदसी विष्ण-वेते । दा-धर्थ पृथिवी-मभितो मयूखैः ।
किन्त-द्विष्णो-र्बल-माहुः । का दीप्तिः किं परायणम् ।
एको य-द्धारय-द्देवः । रेजती रोदसी उभे ।
वाता-द्विष्णो-र्बल-माहुः । अक्षरा-द्दीप्ति-रुच्यते ।
त्रिपदा-द्धारय-द्देवः । य-द्विष्णो-रेक-मुत्तमम् ॥ २८ ॥

अग्नयो वायव-श्चैव । एत-दस्य परायणम् ।
पृच्छामि त्वा परं मृत्युम् । अव-मं मध्य-मञ्चतुम् ।
लोकञ्च पुण्य-पापानाम् । एतत् पृच्छामि संप्रति ।
अमु-माहुः परं मृत्युम् । पवमानं तु मध्यमम् ।

अग्नि-रेवा-वमो मृत्युः । चन्द्रमा-श्चतु-रुच्यते ॥ २९ ॥

अना-भोगाः परं मृत्युम् । पापा-स्संयन्ति सर्वदा ।
आ-भोगा-स्त्वेव संयन्ति । यत्र पुण्य-कृतो जनाः ।
ततो मध्य-ममा-यन्ति । चतु-मग्निं च संप्रति ।
पृच्छामि त्वा पाप-कृतः । यत्र यात-यते यमः ।
त्वन्न-स्तद्-ब्रह्मन् प्र-ब्रूहि । यदि वेत्थाऽसतो गृहान् ॥ ३० ॥

कश्यपा-दुदिता-स्सूर्याः । पापा-न्निर्घ्नन्ति सर्वदा ।
रोदस्यो-रन्त-र्देशेषु । तत्रन् यस्यन्ते वासवैः ।
तेऽशरीराः प्रप-द्यन्ते । यथाऽपुण्यस्य कर्मणः ।
अपाण्य-पादके-शासः । तत्र तेयो-निजा जनाः ।
मृत्वा पुन-र्मृत्युमा-पद्यन्ते । अद्यमाना-स्स्व-कर्मभिः ॥ ३१ ॥

आशा-तिकाः क्रिमय इव । ततः पूयन्ते वासवैः ।
अपैतं मृत्युं जयति । य एवं वेद ।
स खल्वैवं विद्-ब्राह्मणः । दीर्घ-श्रुत्तमो भवति ।

कश्यपस्या-तिथि स्सिद्ध-गमन स्सिद्धा-गमनः।

तस्यैषा भवति। आयस्मिन् थ्सप्त-वा-सवाः।

रोहन्ति पूर्व्या रुहः॥ ३२॥

ऋषिर् ह दीर्घ-श्रुत्तमः। इन्द्रस्य घर्मो अतिथि-रिति।

कश्यपः पश्यको भवति। य-त्सर्वं परि-पश्यतीति सौक्ष्म्यात्।

अथा-ग्ने रष्ट-पुरुषस्य। त-स्यैषा भवति।

अग्ने नय सुपथा राये अस्मान्। विश्वानि देव वयुनानि विद्वान्।

युयो-ध्यस्म-ज्जुहुराण-मेनः। भूयिष्ठान्ते नम उक्तिं-विधेमेति॥ ३३

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद॥ (8)

अग्निश्च जात-वेदाश्च। सहोजा अजिरा-प्रभुः।

वैश्वानरो नर्या-पाश्च। पङ्क्ति-राधाश्च सप्तमः।

विसर्पे-वाऽष्ट-मोऽग्नी-नाम्। एतेऽष्टौ वसवः, क्षिता-इति।

यथर्त्वे वाग्नेर र्चि-र्वर्ण विशेषाः।

नीलार्चि-श्च पीतका र्चि-श्चेति।

अथ वायो-रेकादश पुरुष-स्यैकादश स्त्री-कस्य ।
प्रभ्राज-माना व्यव-दाताः ॥ ३४ ॥
याश्च वासुकि वैद्युताः । रजताः परुषाः श्यामाः ।
कपिला अति-लोहिताः । ऊर्ध्वा अव पत-न्ताश्च ।
वैद्युत इत्येका-दश । नैनं वैद्युतो हिनस्ति ।
य एवं वेद । स हो-वाच व्यासः पाराशर्यः ।
विद्युद्-वध-मेवाहं मृत्यु-मैच्छ-मिति । न त्व कामꣳ हन्ति ॥ ३५
य एवं वेद । अथ गन्धर्व-गणाः । स्वान-भ्राट् ।
अङ्घारि-र्बम्भारिः । हस्त स्सु-हस्तः । कृशानु-र्विश्वा वसुः ।
मूर्धन्वान् थ्सूर्य-वर्चाः । कृतिरि-त्येकादश गन्धर्व-गणाः ।
देवाश्च महा-देवाः । रश्मयश्च देवा गर-गिरः ॥३६ ॥
नैनं गरो हिनस्ति । य एवं वेद ।
गौरी मिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योम-न्निति ।

वाचो विशेषणम् । अथ निग-द्व्या-ख्याता‌ः ।
ता-ननु-क्रमिष्यामः । वराह-व स्स्व-तपसः ॥ ३७ ॥

विद्युन्-महसो धूपयः । श्वापयो गृह मेधा-श्चे-त्येते ।
ये चेमेऽशिमि-विद्विषः । पर्जन्या-स्सप्त पृथिवी-मभि-वर्षन्ति ।
वृष्टिभि-रिति । एत-यैव विभक्ति-विपरीताः ।
सप्तभि-र्वातै रुदी-रिताः । अमू-न्लोका नभि-वर्षन्ति ।
तेशा-मेषा भवति । समान-मेत दुदकम् ॥ ३८ ॥

उच्चैत्य-वचा-हभिः । भूमिं पर्जन्या जिन्वन्ति ।
दिवं जिन्व-न्त्यग्न-य इति । यदक्षरं भूत-कृतम् ।
विश्वे देवा उपासते । महर्षि-मस्य गोप्तारम् ।
जम-दग्निम-कुर्वत । जम-दग्नि-राप्यायते ।
छन्दोभि-श्चतु-रुत्तरैः । राज्ञ-स्सोमस्य तृप्तासः ॥ ३९ ॥

ब्रह्मणा वीर्या-वता । शिवा नः प्रदिशो दिशः ।
तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये ।

दैवी-स्स्वस्तिरस्तु नः । स्वस्ति-र्मानुषेभ्यः ।

ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।

सोमपा (३) अ-सोमपा (३) इति निगद-व्याख्याताः ॥ ४० ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (9)

सहस्र-वृदियं भूमिः । परं व्योम सहस्र-वृत् ।

अश्विना भु-ज्यूना सत्या । विश्वस्य जगत-स्पती ।

जाया भूमिः पति-र्व्योम । मिथुनन्ता अतु-र्यथुः ।

पुत्रो बृहस्पती रुद्रः । सरमा इति स्त्री-पुमम् ।

शुक्रन् वाम-न्य द्यजतं वाम-न्यत् ।

विषु-रूपे अहनी द्यौ-रिव-स्थः ॥ ४१

विश्वा-हि-माया अवथः स्वधावन्तौ ।

भद्रा वां पूषणा-विह-रा-तिरस्तु । वासा-त्यौ चित्रौ जगतो निधानौ ।

द्यावा-भूमी चरथः सꣳ सखायौ । ता-वश्विना रासभा-श्वा हवं मे ।

शुभ-स्पती आगतꣳ सूर्यया सह ।

त्युग्रो ह-भुज्यु मश्विनो द-मेघे ।
रयिन्न कश्चिन् ममृ-वां ( २ ) अ-वा हाः ।
तमूह-थुर्नौ-भि-रात्मन्-वती-भिः ।
अन्तरिक्ष-प्रुड्-भिर-पोदकाभिः ॥ ४२ ॥

तिस्रः, क्षप-स्त्रिर-हाति-व्रजद्-भिः । ना-सत्या भुज्यु-मू-हथुः पतङ्गैः ।
समुद्रस्य धन्व न्नार्द्रस्य पारे । त्रिभी-रथै-श्शत-पद्भिः षडश्वैः ।
सवितारं-वि -तन्वन्तम् । अनु-बध्नाति शांबरः ।
आप-पूर्ष-बर-श्चैव । सवितारे-पसोऽभवत् ।
त्यꣳ सु-तृप्तं विदि-त्वैव । बहु-सोम गिरं वशी ॥ ४३ ॥

अन्वेति तुग्रो-व क्रियान्तम् । आय-सूया-न्त्सोम-तृ-प्सुषु ।
स सङ्ग्राम स्तमो-द्यो ऽत्योतः । वाचो गाः पिपाति तत् ।
स तद्-गोभि-स्स्तवा ऽत्ये-त्यन्ये । रक्षसा-नन्विता-श्च ये ।
अन्वेति परि-वृत्या ऽस्तः । एव-मेतौ-स्थो अश्विना ।
ते एते द्युः पृथिव्योः । अह-रह-गर्भ-न्दधाथे ॥ ४४ ॥

तयो-रेतौ वत्साव हो-रात्रे । पृथिव्या अहः । दिवो रात्रिः ।
ता अवि-सृष्टौ । दम्पती एव भवतः । तयो-रेतौ वत्सौ ।
अग्निश्चा-दित्यश्च । रात्रे-र्वत्सः ।
श्वेत आदित्यः । अह्नो ऽग्निः ॥ ४५ ॥

ताम्रो अरुणः । ता अवि-सृष्टौ । दम्पती एव भवतः ।
तयो-रेतौ वत्सौ । वृत्रश्च वैद्युतश्च । अग्ने-र्वृत्रः ।
वैद्युत आदित्य-स्य । ता अवि-सृष्टौ ।
दम्पती एव भवतः । तयो-रेतौ वत्सौ ॥ ४६ ॥

उष्मा च नीहा-रश्च । वृत्र-स्योष्मा ।
वैद्युतस्य नी-हारः । तौ ता-वेव प्रति-पद्येते ।
से-यꣳ रात्री गर्भिणी पुत्रेण संव-सति ।
तस्या वा एत-दुल्बणम् । यद्-रात्रौ रश्मयः ।
यथा गो-र्गर्भिण्या उल्बणम् । एवमे-तस्या उल्बणम् ।
प्रज-यिष्णुः प्रजया-च पशुभि-श्च भवति ।

य एवं वेद । एत-मुद्यन्त मपि-यन्तं चेति ।

आदित्यः पुण्यस्य वत्सः । अथ पवित्रा-ङ्गिरसः ॥ ४७ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (10)

पवित्रवन्तः परि-वाजमा-सते । पितैषां प्रत्नो अभि-रक्षति व्रतम् ।

मह-स्समुद्रं वरुण स्तिरो-दधे । धीरा इच्छेकु-र्धरुणे ष्वा-रभम् ।

पवित्रं ते विततं ब्रह्मणस्पते । प्रभु-र्गात्राणि पर्येषि विश्वतः ।

अतप्त तनूर्नत दामो अश्नुते । शृतास इद्वहन्त स्तत् समा-शत ।

ब्रह्मा देवानाम् । अस-त स्सद्ये त-तक्षुः ॥ ४८ ॥

ऋषय-स्सप्ता त्रि-श्च यत् । सर्वे ऽत्रयो अगस्त्य-श्च ।

नक्षत्रै -श्शङ्कृतो ऽवसन् ।

अथ सवितुः श्यावा श्व-स्या ऽवर्ति-कामस्य ।

अमी य ऋ-क्षा निहिता-स उच्चा ।

नक्तं द-दृश्रे कुहचि-द्दि-वेयुः । अदब्धानि वरुणस्य व्रतानि ।

विचाक-श च्चन्द्रमा नक्षत्र-मेति ।
तत्स वितु-र्वरेण्यं । भर्गो देवस्य धीमहि ॥ ४९ ॥

धियो यो नः प्रचोदयात् । तत्स वितु-र्वृणीमहे ।
वय-न्देवस्य भोजनम् । श्रेष्ठꣳ सर्व-धातमम् ।
तुरं भगस्य धीमहि । अपागू-हत सविता तृभीन् ।
सर्वा-दिवो अन्धसः । नक्त-न्तान्य भव-न्दृशे ।
अस्थ्य-स्थ्ना सं-भविष्यामः । नाम ना-मैव नाम-मे ॥ ५० ॥

नपुꣳ सकं पुमाꣳ स्त्र्य-स्मि । स्थावरो ऽस्म्यथ जङ्गमः ।
यजेऽयक्षि यष्टाहे च । मया भूतान्य-यक्षत ।
पशवो मम भूतानि । अनू-बन्ध्यो ऽस्म्यहं विभुः ।
स्त्रिय-स्सतीः । ता उमे पुꣳ-स आहुः ।
पश्य-दक्षण्वा न्नवि-चेत-दन्धः । कविर्यः पुत्रस्य इमा चिकेत ॥

यस्ता विजाना-थ्सवितुः पिता-सत् । अन्धो मणिम-विन्दत् ।
तम-नङ्गुलि-रावयत् । अग्रीवः प्रत्य-मुञ्चत् ।

तम-जिह्वा अस-श्चत । ऊर्ध्व-मूल-मवा-क्छा-खम् ।
वृक्षं यो वेद् सम्प्रति । न-स जातु जनः श्रद्द-ध्यात् ।
मृत्युर्मा मारया-दितिः । हसितꣳ रुदित-ङ्गीतम् ॥ ५२ ॥
वीणा-पण-वला सितम् । मृत-ञ्जीवं च यत्किंचित् ।
अङ्गानि स्नेव विद्धि-तत् । अ-तृष्यꣳ स्तृष्य-ध्यायत् ।
अस्मा ज्जाता-मे मिथू चरन्न् । पुत्रो निर्ऋत्या वै-देहः ।
अचेता यश्च चेतनः । स-तं मणिम-विन्दत् ।
सो ऽनङ्गुलि-रावयत् । सो ऽग्रीवः प्रत्य-मुञ्चत् ॥ ५३ ॥
सो ऽजिह्वो अस-श्चत । नैत-मृशिं विदित्वा नगरं प्रविशेत् ।
यदि प्रविशेत् । मिथौ चरित्वा प्रविशेत् ।
तत्-सम्भवस्य व्रतम् । आत-मग्ने रथन्तिष्ठ ।
एका श्च-मेकयो जनम् । एक-चक्र-मेक-धुरम् ।
वात-ध्राजि-गतिं विभो । न रिष्यति न व्यथते ॥ ५४ ॥
नास्या-क्षो यातु सज्जति । यच्छ्वे-तान् रोहिताꣳ श्चाग्नेः ।

रथे युक्त्वा ऽधि-तिष्ठति । एकया-च दश-भिश्च स्व-भूते ।
द्वाभ्या-मिष्ट-ये विꣳ शत्या-च । तिसृ-भिश्च वहसे त्रिꣳ शता च ।
नियुद्भि-र्वाय विहिता विमुञ्च ॥ ५५ ॥

| |
|---|
| श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः । ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (11) |

आ-तनुष्व प्र-तनुष्व । उद्धमाऽऽधम सन्धम ।
आदित्ये चन्द्र-वर्णानाम् । गर्भमा-धेहि यः पुमान् ।
इत-स्सिक्तꣳ सूर्य-गतम् । चन्द्रमसे रसङ्कृधि ।
वाराद-ञ्जनया ग्रेऽग्निम् । य एको रुद्र उच्यते ।
असं-ख्याता-स्सहस्राणि । स्मर्यते न-च दृश्यते ॥ ५६ ॥
एवमे तन्नि बोधत । आ-मन्द्रै रिन्द्र हरिभिः ।
याहि मयूर-रोमभिः । मा त्वा के-चिन्नियेमु-रिन्न पाशिनः ।
दधन्वे-व ता इहि । मा मन्द्रै-रिन्द्र हरिभिः ।
यामि मयूर-रोमभिः । मा मा के-चिन्नियेमु-रिन्न पाशिनः ।
निधन्वेव तां ( २ ) इमि । अणु-भिश्च महद्भिश्च ॥ ५७ ॥

निघृष्वैर समायुतैः। कालै हंरि-त्वमा पन्नैः।

इन्द्रा-याहि सहस्र-युक्। अग्नि-र्विभ्राष्टि वसनः।

वायु-श्श्वेत सिक-द्रुकः। संवथ्सरो विषू-वर्णैः।

नित्यास्ते ऽनु चरा-स्तव।

सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम्।

इन्द्रा-गच्छ हरि-व आ-गच्छ मेधा-तिथेः।

मेष वृषण-श्वस्य मेने ॥ ५८ ॥

गौराव-स्कन्दि न्नहल्या-यै जार।

कौशिक-ब्राह्मण गौतम-ब्रुवाण।

अरुणा-श्वा इहा-गताः। वसवः पृथिवि-क्षितः।

अष्टौ-दिग्वास-सो ऽग्नयः। अग्निश्च जातवेदाश्चे-त्येते।

ताम्रा-श्वा स्ताम्र-रथाः। ताम्र-वर्णा स्तथा ऽसिताः।

दण्ड-हस्ताः खा-दग्दतः। इतो रुद्राः पराङ्गताः॥ ५९॥

उक्तꣳ स्थानं प्रमाणञ्च पुर-इत। बृहस्पति-श्च सविता च।

विश्वरूपै रिहा-गताम् । रथेनो दक-वर्त्मना ।

अप्सुषा इति तद्-वयोः । उक्तो वेषो वासाꣳ सि-च ।

काला-वय-वाना मितः प्रतीज्या । वा-सात्या इत्यश्विनोः ।

को ऽन्तरिक्षे श्ब्दङ्करो-तीति ।

वासिष्टो रौहिणो मीमाꣳ सा-ञ्चक्रे ।

तस्यैषा भवति । वा-श्रेव विद्यु-दिति ।

ब्रह्मण उदरण-मसि । ब्रह्मण उदीरण-मसि ।

ब्रह्मण आस्तरण-मसि । ब्रह्मण उपस्तरण-मसि ॥ ६० ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (12)

[ अपक्रा-मत गर्भिण्यः ]

अष्ट-योनी मष्ट-पुत्राम् । अष्ट-पत्नी मिमां महीम् ।

अहं वेद न मे मृत्युः । नचा-मृत्युर घाहरत् ।

अष्टयो न्यष्ट-पुत्रम् । अष्ट-पदिद मन्तरिक्षम् ।

अहं वेद न मे मृत्युः । नचा-मृत्युर घाहरत् ।
अष्ट-योनी मष्ट-पुत्राम् । अष्ट-पत्नी ममू-न्दिवम् ॥ ६१ ॥

अहं वेद न मे मृत्युः । नचा-मृत्युर घाहरत् ।
सुत्रा-माणं मही-मूषु । अदिति-र्द्यौ रदिति-रन्तरिक्षम् ।
अदिति-र्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च-जनाः ।
अदिति-र्जात मदिति-जनित्वम् । अष्टौ पुत्रासो अदितेः ।
ये जाता-स्तन्वः परि । देवां ( २ ) उप-प्रै-त्सप्त-भिः ॥६२ ॥

परा मार्ताण्ड-मास्यत् । सप्त-भिः पुत्रैर-दितिः ।
उप-प्रैत् पूर्व्यं युगम् । प्रजायै मृत्यवे तत् ।
परा मार्ताण्ड-माभर-दिति । ता-ननुक्र-मिष्यामः ।
मित्र-श्च वरुण-श्च । धाता चा-र्यमा च ।
अꣳ शश्च भगश्च । इन्द्र-श्च विवस्वाꣳ श्चे-त्येते ।
हिरण्य गर्भो हꣳ स-श्शुचिषत् ।

ब्रह्मजज्ञानं तदित्पद-मिति । गर्भं प्राजा-पत्यः ।
अथ पुरुषः सप्त पुरुषः ॥ ६३ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (13)

[ यथास्थानं गर्भिण्यः ]

योऽसौ तपन्नु-देति । स सर्वेषां भूतानां प्राणाना दायो-देति ।
मा मे प्रजाया मा पशूनाम् । मा मम प्राणाना दायो-दगाः ।
असौ योऽस्त-मेति । स सर्वेषां भूतानां प्राणाना दायाऽस्त-मेति ।
मा मे प्रजाया मा पशूनाम् । मा मम प्राणाना दाया ऽस्तङ्गाः ।
असौ य आ-पूर्यति । स सर्वेषां भूतानां प्राणैरा-पूर्यति ॥ ६४ ॥

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरा-पूरिष्ठाः ।
असौ यो ऽपक्षीयति । स सर्वेषां भूतानां प्राणैर-पक्षीयति ।
मा मे प्रजाया मा पशूनाम् । मा मम प्राणैर-पक्षेष्ठाः ।
अमूनि नक्षत्राणि । सर्वेषां भूतानां प्राणै-रप-

प्र-सर्पन्ति चो-त्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् ।

मा मम प्राणै-रप प्र-सृपत मो-त्सृपत ॥ ६५ ॥

इमे मासाश्चा-र्ध-मासाश्च । सर्वेषां भूतानां प्राणै-रप-

प्र-सर्पन्ति चो-त्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् ।

मा मम प्राणै-रप प्र-सृपत मो-त्सृपत । इम ऋतवः ।

सर्वेषां भूतानां प्राणै-रप प्र-सर्पन्ति चो-त्सर्पन्ति च ।

मा मे प्रजाया मा पशूनाम् ।

मा मम प्राणै-रप प्र-सृपत मो-त्सृपत । अयꣳ संवत्सरः ।

सर्वेषां भूतानां प्राणै-रप प्र-सर्पंति चो-त्सर्पंति च ॥ ६६ ॥

मा मे प्रजाया मा पशूनाम् । मा मम प्राणै-रप प्र-सृप मो-त्सृप ।

इद-महः । सर्वेषां भूतानां प्राणै-रप प्र-सर्पंति चो-त्सर्पंति च ।

मा मे प्रजाया मा पशूनाम् । मा मम प्राणै-रप प्र-सृप मोत्सृप ।

इयꣳरात्रिः । सर्वेषां भूतानां प्राणै-रप प्र-सर्पंति चो-त्सर्पंति च ।

मा मे प्रजाया मा पशूनाम्। मा मम प्राणै-रप प्र-सृप मो-त्सृप।

ॐ भुर्भुवस्स्वः। एत-द्वो मिथुनं मा नो मिथुनꣳ रीढ्वम्॥६७॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद॥ (14)

अथा-दित्य-स्याऽष्ट-पुरुषस्य।

वसूना-मादित्यानाꣳ-स्थाने स्व-तेजसा भानि।

रुद्राणा-मादित्यानाꣳ-स्थाने स्व-तेजसा भानि।

आदित्याना-मादित्यानाꣳ-स्थाने स्व-तेजसा भानि।

सताꣳ सत्या-नाम्। आदित्यानाꣳ स्थाने स्व-तेजसा भानि।

अभि-धून्वता मभिघ्न-ताम्। वात-वतां मरुताम्।

आदित्यानाꣳ-स्थाने स्व-तेजसा भानि।

ऋ-भूणा मादित्यानाꣳ-स्थाने स्व-तेजसा भानि।

विश्वेषा न्देवा-नाम्। आदित्यानाꣳ-स्थाने स्व-तेजसा भानि।

संवत्सर-स्य सवितुः।

आदित्य-स्य स्थाने स्व-तेजसा भानि।

ॐ भुर्भुवस्स्वः ।

रश्मयो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ६८ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (15)

आरोगस्य स्थाने स्व-तेजसा भानि ।

भ्राजस्य स्थाने स्व-तेजसा भानि ।

पट-रस्य स्थाने स्व-तेजसा भानि ।

पत-ङ्गस्य स्थाने स्व-तेजसा भानि ।

स्वर्ण-रस्य स्थाने स्व-तेजसा भानि ।

ज्योतिषीम-तस्य स्थाने स्व-तेजसा भानि ।

विभासस्य स्थाने स्वतेजसा भानि ।

कश्यपस्य स्थाने स्वतेजसा भानि । ॐ भुर्भुवस्स्वः ।

आपो वो मिथुनं-मा नो मिथुनꣳ-रीढ्वम् ॥ ६९ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (16)

अथ वायो-रेकादश-पुरुष स्यैकादश-स्त्री-कस्य ।

प्रभ्राज-मानाना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

व्यव-दाताना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

वासुकि-वैद्युताना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

रजताना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

परुषाणा ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

श्यामाना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

कपिलाना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

अति-लोहिताना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

ऊर्ध्वाना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ॥ ७० ॥

अव-पतन्ताना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

वैद्युताना ँ रुद्राणा ँ-स्थाने स्व-तेजसा भानि ।

प्रभ्राज-मानीना ँ रुद्राणीना ँ-स्थाने स्व-तेजसा भानि ।

व्यव-दातीना ँ रुद्राणीना ँ-स्थाने स्व-तेजसा भानि ।

वासुकि-वैद्युतीनाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

रजतानाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

परुषाणाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

श्यामानाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

कपिलानाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

अति-लोहितीनाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

ऊर्ध्वानाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

अव-पतन्तीनाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

वैद्युतीनाꣳ रुद्राणीनाꣳ-स्थाने स्व-तेजसा भानि ।

ॐ भुर्भुवस्स्वः । रूपाणि वो मिथुनं मा नो मिथुनꣳरीढ्वम् ॥ ७१ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (17)

अथा-ग्ने रष्ट-पुरुषस्य ।

अग्नेः पूर्व-दिश्यस्य स्थाने स्व-तेजसा भानि ।

जातवेदस उप-दिश्यस्य स्थाने स्व-तेजसा भानि ।

स-होजसो दक्षिण-दिश्यस्य स्थाने स्व-तेजसा भानि ।

अजिरा-प्रभव उप-दिश्यस्य स्थाने स्व-तेजसा भानि ।

वैश्वानर-स्या ऽपर-दिश्यस्य स्थाने स्व-तेजसा भानि ।

नर्या-पस उप-दिश्यस्य स्थाने स्व-तेजसा भानि ।

पङ्क्ति-राधस उदग्-दिश्यस्य स्थाने स्व-तेजसा भानि ।

वि-सर्पिण उप-दिश्यस्य स्थाने स्व-तेजसा भानि ।

ॐ भुर्भुवस्स्वः । दिशो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ७२ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (18)

दक्षिण-पूर्वस्यान्-दिशि विसर्पी नरकः । तस्मान्नः परिपाहि ।

दक्षिणा-परस्यान्-दिश्य विसर्पी नरकः । तस्मान्नः परिपाहि ।

उत्तर-पूर्वस्यान्-दिशि विषादी नरकः । तस्मान्नः परिपाहि ।

उत्तरा-परस्यान्-दिश्य विषादी नरकः । तस्मान्नः परिपाहि ।

आ यस्मि-न्त्सप्तवा सवा इन्द्रियाणि शतक्रत-वित्येते ॥७३

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (19)

इन्द्रघोषा वो वसुभिः पुरस्ता-दुप-दधताम् ।

मनोजवसो वः पितृभि-र्दक्षिणत उप-दधताम् ।

प्रचेता वो रुद्रैः पश्चा-दुप-दधताम् ।

विश्वकर्मा व आदित्यै-रुत्तरत उप-दधताम् ।

त्वष्टा वो रूपै रुप-रिष्टा दुप-दधताम् । संज्ञानं वः पश्चादिति ।

आदित्य-स्सर्वोऽग्निः पृथिव्याम् । वायु-रन्तरिक्षे । सूर्यो दिवि ।

चन्द्रमा दिक्षु । नक्षत्राणि स्व-लोके । एवा ह्येव । एवा ह्यग्ने ।

एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः ॥ ७४

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (20)

आप-मापा-मप-स्सर्वाः । अस्मा-दस्मा-दितोऽमुतः ।

अग्नि-र्वायुश्च सूर्यश्च । सह सञ्चस्कर-र्द्धिया ।

वाय्व-श्वा रश्मि-पतयः । मरीच्या-त्मानो अ-द्रुहः ।

देवी-र्भुवन-सूवरीः । पुत्रव-त्वाय मे सुत ।

महा-नाम्नी-र्महा-मानाः । महसो मह-सस्स्वः ॥७५ ॥

देवीः पर्जन्य-सूवरीः । पुत्रव-त्वाय मे सुत ।

अपाऽश्न्युष्णि मपा रक्षः । अपाऽऽश्न्युष्णि मपार-घम् ।

अपा-घ्रामप -चाऽवर्तिम् । अप-देवी-रितो हित ।

वज्र-न्देवी-रजीताꣳश्च । भुवन-न्देव-सूवरीः ।

आदित्यान-दिति-न्देवीम् । योनिनो-र्ध्व-मुदीषत ॥ ७६ ॥

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ।

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।

केतवो अरुणा-सश्च । ऋषयो वात-रशनाः ।

प्रतिष्ठाꣳशतधा हि । समा-हितासो सहस्र-धायसम् ।

शिवा न-श्शन्तमा भवन्तु । दिव्या आप ओषधयः ।

सु-मृडीका सरस्वति । मा ते व्योम सन्दृशि ॥ ७७ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (21)

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद । योऽपा-मायतनं वेद ।
आयतनवान् भवति । अग्निर्वा अपा-मायतनम् ।
आयतनवान् भवति । योऽग्ने-रायतनं वेद ॥ ७८ ॥
आयतनवान् भवति । आपो वा अग्ने-रायतनम् ।
आयतनवान् भवति । य एवं वेद ।
योऽपा-मायतनं वेद । आयतनवान् भवति ।
वायुर्वा अपा-मायतनम् । आयतनवान् भवति ।
यो वायो-रायतनं वेद । आयतनवान् भवति ॥ ७९ ॥
आपो वै वायो-रायतनम् । आयतनवान् भवति ।
य एवं वेद । योऽपा-मायतनं वेद ।
आयतनवान् भवति । असौ वै तप-न्नपा-मायतनम् ।
आयतनवान् भवति । यो ऽमुष्य तपत आयतनं वेद ।

आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् ॥ ८०

आयतनवान् भवति । य एवं वेद ।

योऽपा-मायतनं वेद । आयतनवान् भवति ।

चन्द्रमा वा अपा-मायतनम् । आयतनवान् भवति ।

यश्चन्द्र-मस आयतनं वेद । आयतनवान् भवति ।

आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति ॥ ८१ ॥

य एवं वेद । योऽपा-मायतनं वेद ।

आयतनवान् भवति । नक्षत्राणि वा अपा-मायतनम् ।

आयतनवान् भवति । यो नक्षत्राणा-मायतनं वेद ।

आयतनवान् भवति । आपो वै नक्षत्राणा-मायतनम् ।

आयतनवान् भवति । य एवं वेद ॥ ८२ ॥

योऽपा-मायतनं वेद । आयतनवान् भवति ।

पर्जन्यो वा अपा-मायतनम् । आयतनवान् भवति ।

यः पर्जन्य-स्यायतनं वेद । आयतनवान् भवति ।

आपो वै पर्जन्य-स्याऽऽयतनम्। आयतनवान् भवति।

य एवं वेद। योऽपा-मायतनं वेद॥ ८३॥

आयतनवान् भवति। संवत्सरो वा अपा-मायतनम्।

आयतनवान् भवति। यस्संवत्सर-स्यायतनं वेद।

आयतनवान् भवति। आपो वै संवत्सर-स्यायतनम्।

आयतनवान् भवति। य एवं वेद।

योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति॥ ८४॥

इमे वै लोका अप्सु प्रतिष्ठिताः। त-देषाऽभ्य-नूक्ता।

अपाꣳ रस मुद-यꣳ सन्न्। सूर्ये शुक्रꣳ समा-भृतम्।

अपाꣳ रसस्य-यो रसः। तं वो गृह्णा म्युत्तम-मिति।

इमे वै लोका अपाꣳ रसः। तेऽमुष्मि न्नादित्ये समा-भृताः।

जानु-दघ्नी मुत्तर-वेदीं खात्वा।

अपां पूर-यित्वा गुल्फ-दघ्नम्॥ ८५॥

पुष्कर-पर्णैः पुष्कर-दण्डैः पुष्करै-श्च सꣳ स्तीर्य।

तस्मिन् विहायसे । अग्निं प्रणी-योप समाधाय ।

ब्रह्म-वादिनो वदन्ति । कस्मात् प्रणीते ऽय-मग्नि श्चीयते ।

सा प्रणीते ऽय-मप्सु ह्य-य श्चीयते ।

असौ भुवनेप्यना हिता-ग्नि रेताः ।

त-मभित एता अबीष्टका उप-दधाति ।

अग्निहोत्रे दर्शपूर्ण मासयोः । पशुबन्धे चातु-र्मास्येषु ॥ ८६

अथो आहुः । सर्वेषु यज्ञ-क्रतुष्विति ।

एत-द्धस्म वा आहु श्शाण्डिलाः । कमग्नि-श्चिनुते ।

सत्रिय-मग्नि श्चिन्वानः । संवत्सरं प्रत्यक्षेण ।

कमग्नि-श्चिनुते । सावित्र-मग्नि श्चिन्वानः ।

अमु-मादित्यं प्रत्यक्षेण । कमग्नि-श्चिनुते ॥ ८७ ॥

नाचिकेत-मग्नि श्चिन्वानः । प्राणान् प्रत्यक्षेण । कमग्नि-श्चिनुते ।

चातु-होत्रिय-मग्नि श्चिन्वानः । ब्रह्म प्रत्यक्षेण । कमग्नि-श्चिनुते ।

वैश्व-सृज-मग्नि श्चिन्वानः । शरीरं प्रत्यक्षेण । कमग्नि-श्चिनुते ।

उपानु-वाक्य माशु-मग्नि श्चिन्वानः ॥ ८८ ॥

इमान् लोकान् प्रत्यक्षेण । कमग्नि-श्चिनुते ।

इम-मारुण केतुक-मग्नि श्चिन्वानः इति ।

य एवासौ । इत-श्चा ऽमुत-श्चा ऽव्यती-पाती ।

त-मिति । योऽग्ने र्मिथू-या वेद । मिथुनवान् भवति ।

आपो वा अग्ने र्मिथू-याः । मिथुनवान् भवति । य एवं वेद ॥ ८९

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (22)

आपो वा इदमासन् त्सलिल-मेव ।

स प्रजापति-रेकः पुष्कर-पर्णे सम-भवत् ।

तस्यान्तर् मनसि काम स्सम वर्तत । इदꣳ सृजेय-मिति ।

तस्मा-द्य त्पुरुषो मनसाऽभि गच्छति । तद्-वाचा वदति ।

तत्-कर्मणा करोति । त-देषाऽभ्य-नूक्ता ।

काम-स्त दग्रे सम वर्तताधि ।

मनसो रेतः प्रथमं यदासीत् ॥ ९० ॥

सतो बन्धुम सति निर-विन्दन्न् ।

हृदि प्रतीष्या कवयो मनीषेति ।

उपैनन्त दुपन-मति । यत् कामो भवति । य एवं वेद ।

स तपो ऽतप्यत । स तप-स्तप्त्वा । शरीर मधू-नुत ।

तस्य यन् माꣳ समा-सीत् ।

ततोऽरुणाः केतवो वात-रशना ऋषय उद-तिष्ठन्न् ॥ ९१ ॥

ये नखाः । ते वैखा-नसाः । ये वालाः । ते वाल-खिल्याः ।

यो रसः । सो ऽपाम् । अन्तर-तः कूर्मं भूतꣳ सर्पन्तम् ।

तमब्रवीत् । मम वैत्वङ् माꣳ सा । सम-भूत् ॥ ९२ ॥

नेत्यब्रवीत् । पूर्वमे-वाह मिहास-निति ।

तत्पुरुषस्य पुरुषत्वम् । स सहस्र-शीर्षा पुरुषः ।

सहस्राक्ष स्सहस्रपात् । भूत्वोद-तिष्ठत् ।

तमब्रवीत् । त्वं वै पूर्वꣳ सम-भूः ।

त्व-मिदं पूर्वः कुरुष्वेति । स इत आदा-यापः । ॥ ९३ ॥

अञ्जलिना पुरस्ता-दुपा-दधात् । एवा ह्ये-वेति ।

तत आदित्य उद-तिष्ठत् । सा प्राची दिक् ।

अथाऽरुणः केतु-र्दक्षिणत उपा-दधात् ।

एवा ह्य-ग्न इति । ततो वा अग्नि-रुद तिष्ठत् ।

सा दक्षिणा दिक् । अथा-रुणः केतुः पश्चा-दुपा-दधात् ।

एवाहि वायो इति ॥ ९४ ॥

ततो वायु-रुद -तिष्ठत् । सा प्रतीची दिक् ।

अथा-रुणः केतु-रुत्तरत उपा-दधात् । एवा-हीन्द्रे-ति ।

ततो वा इन्द्र उद-तिष्ठत् । सो-दीची दिक् ।

अथा-रुणः केतु-र्मध्य उपा-दधात् । एवाहि पूष-न्निति ।

ततो वै पूषोद-तिष्ठत् । सेय-न्दिक् ॥ ९५ ॥

अथा-रुणः केतु रुप-रिष्टा दुपा-दधात् । एवाहि देवा इति ।

ततो देव-मनुष्याः पितरः । गन्धर्वा-प्सरस श्चोद-तिष्ठन्न् ।

सो-ध्र्वा दिक् । या विप्रुषो विपरा पतन्न् ।
ताभ्यो ऽसुरा रक्षाꣳसि पिशाचा श्चोद-तिष्ठन्न् ।
तस्मात्ते परा भवन्न् । वि-प्रुड्-भ्यो हिते सम भवन्न् ।
तदेषा-भ्यनूक्ता ॥ ९६ ॥

आपो-ह यद्-बृहती गर्भ-मायन्न् ।
दक्षन् दधाना जनयन्ती स्स्वयंभुम् ।
तत इमेध्य सृज्यन्त सर्गाः । अद्भ्यो वा इदꣳ सम-भूत् ।
तस्मा-दिदꣳ सर्वं ब्रह्म स्वयं-भ्विति ।
तस्मा दिदꣳ सर्वꣳ शिथिल-मिवा ऽध्रुव-मिवा भवत् ।
प्रजापति र्वाव तत् । आत्म-नात्मानं विधाय ।
त-देवानु प्राविशत् । तदेषाभ्य-नूक्ता ॥ ९७ ॥

विधाय लोकान् विधाय भूतानि ।
विधाय सर्वाः प्रदिशो-दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्य ।

आत्म-नात्मान-मभि संविवे-शेति । सर्वमे वेद-माप्त्वा ।

सर्व-मव रुद्ध्य । त-देवानु प्रविशति । य एवं वेद ॥ ९८ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (23)

चतुष्टय्य आपो गृह्णाति । चत्वारि वा अपाꣳ रूपाणि ।

मेघो विद्युत् । स्तन-यित्नु र्वृष्टिः । तान् येवा वरुन्धे ।

आत पति वर्ष्या गृह्णाति । ताः पुरस्ता दुपदधाति ।

एता वै ब्रह्मवर्चस्या आपः । मुखत एव ब्रह्मवर्चस-म वरुन्धे ।

तस्मान्-मुखतो ब्रह्मवर्चसि तरः ॥ ९९ ॥

कूप्या गृह्णाति । ता दक्षिणत उपदधाति ।

एता वै तेजस्विनी रापः । तेज एऽवास्य दक्षिणतो दधाति ।

तस्मा द्दक्षिणोऽर्ध स्तेजस्वि तरः । स्थावरा गृह्णाति ।

ताः पश्चा दुपदधाति । प्रतिष्ठिता वै स्थावराः ।

पश्चादेव प्रति-तिष्ठति । वहन्ती र्गृह्णाति ॥ १०० ॥

ता उत्तर-त उप-दधाति । ओजसा वा एता-वहन्ती-

रिवोद्-गती रिव-आकूजती रिव-धावन्तीः ।

ओज एवास्यो त्तरतो दधाति ।

तस्मा दुत्तरो ऽर्ध ओजस्वि तरः ।

संभार्या गृह्णाति । ता मध्य उप-दधाति ।

इयं वै संभार्याः । अस्यामेव प्रति-तिष्ठति ।

पल्व-ल्या गृह्णाति । ता उपरिष्टा-दुपा-दधाति ॥ १०१ ॥

असौ वै पल्वयाः । अमुष्या-मेव प्रति-तिष्ठति ।

दिक्षूप दधाति । दिक्षु वा आपः ।

अन्नं वा आपः । अद्भ्यो वा अन्न ञ्जायते ।

य देवाद्भ्यो ऽन्न ञ्जायते । तद वरुन्धे ।

तं वा एत मरुणाः केतवो वात-रशना ऋषयो ऽचिन्वन्न् ।

तस्मा दारुण केतुकः ॥ १०२ ॥

त-देषाभ्य-नूक्ता । केतवो अरुणा-सश्च ।

ऋषयो वात-रशनाः । प्रतिष्ठाꣳ शत-धाहि ।

समा-हितासो सहस्र धायस-मिति ।

शत श-श्चैव सहस्र श-श्च प्रति-तिष्ठति ।

य एत-मग्नि ञ्चिनुते । य उचैन-मेवं वेद ॥ १०३ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (24)

जानु-दघ्नी मुत्तरवेदीङ खात्वा । अपां पूरयति ।

अपाꣳ सर्वत्वाय । पुष्कर-पर्णꣳ रुक्मं पुरुष मित्युप-दधाति ।

तपो वै पुष्कर-पर्णम् । सत्यꣳ रुक्मः । अमृतं पुरुषः ।

एता-वद्वा वास्ति । याव-दे-तत् । याव-दे-वास्ति ॥ १०४ ॥

तद-वरुन्धे । कूर्म मुप-दधाति । अपा-मेव मेधम वरुन्धे ।

अथो स्वर्गस्य लोकस्य समष्ट्यै । आप-मापा-मप स्सर्वाः ।

अस्मा-दस्मा दितोऽमुतः । अग्नि-र्वायुश्च सूर्यश्च ।

सह-सञ्चस्कर-र्द्धिया इति । वाय्व-श्वा रश्मि-पतयः ।

लोकं पृण च्छिद्रं पृण ॥ १०५ ॥

या-स्तिस्रः परमजाः। इन्द्रघोषा वो वसुभि-रेवा ह्ये-वेति।

पञ्च-चितय उप-दधाति। पाङ्क्तो ऽग्निः। यावा नेवा-ग्निः।

त-ञ्चिनुते। लोकं-पृणया द्वितीया मुपदधाति।

पञ्च पदा वै विराट्। तस्या वा इयं पादः।

अन्तरिक्षं पादः। द्यौः पादः। दिशः पादः।

परो-रजाः पादः। विराज्ये-व प्रति-तिष्ठति।

य एत-मग्नि ञ्चिनुते। य उचैन-मेवं वेद॥ १०६॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद॥ (25)

अग्निं प्रणीयोप समाधाय।

त-मभित एता अबीष्टका उपदधाति।

अग्निहोत्रे दर्शपूर्ण मासयोः। पशुबन्धे चातु र्मास्येषु।

अथो आहुः। सर्वेषु यज्ञ क्रतु-ष्विति।

अथ हस्मा हारुण स्स्वायं-भुवः।

सावित्रः सर्वो ऽग्नि रित्य-ननुषङ्गं मन्या-महे।

नाना वा एतेषां वीर्याणि । क-मग्नि श्चिनुते ॥ १०७ ॥

सत्रिय-मग्नि-श्चिवानः । कमग्नि-श्चिनुते ।

सावित्र-मग्नि-श्चिवानः । कमग्नि-श्चिनुते ।

नाचिकेत-मग्नि-श्चिवानः । कमग्नि-श्चिनुते ।

चातुर्होत्रिय-मग्नि-श्चिवानः । कमग्नि-श्चिनुते ।

वैश्वसृज-मग्नि-श्चिवानः । कमग्नि-श्चिनुते ॥ १०८ ॥

उपानु-वाक्य माशु-मग्नि-श्चिवानः । कमग्नि-श्चिनुते ।

इममारुण केतुक-मग्नि-श्चिवान इति । वृषा वा अग्निः ।

वृषाणो सꣳ स्फाल-येत् । हन्येता-स्य यज्ञः ।

तस्मा न्नानु-षज्यः । सोत्तर-वेदिषु क्रतुषु चिन्वीत ।

उत्तर-वेद्याꣳ ह्यग्नि-श्चीयते । प्रजा-काम-श्चिन्वीत ॥ १०९ ॥

प्राजा-पत्यो वा एषो ऽग्निः । प्राजा-पत्याः प्रजाः ।

प्रजावान् भवति । य एवं वेद । पशुकाम श्चिन्वीत ।

संज्ञानं वा एतत् पशूनाम् । यदापः ।

पशूना-मेव संज्ञाने ऽग्नि श्चिनुते ।
पशुमान् भवति । य एवं वेद ॥ ११० ॥
वृष्टिकाम-श्चिन्वीत । आपो वै वृष्टिः ।
पर्जन्यो वर्षुको भवति । य एवं वेद ।
आम-यावी चिन्वीत । आपो वै भेषजम् ।
भेषजमे-वास्मै करोति । सर्व-मायुरेति ।
अभिचरँ-श्चिन्वीत । वज्रो वा आपः ॥ १११ ॥
वज्रमेव भ्रातृव्येभ्यः प्रहरति । स्तृणुत एनम् ।
तेज-स्कामो यश-स्कामः ।
ब्रह्मवर्चस-काम स्स्वर्ग-काम श्चिन्वीत । एता वद्वा वास्ति ।
याव-देतत् । याव-देवास्ति । तद-वरुन्धे ।
तस्यै तद् व्रतम् । वर्षति न धावेत् ॥ ११२ ॥
अमृतं वा आपः । अमृतस्या नन्त-रित्यै ।
नाप्सु मूत्र-पुरीष-ङ्कुर्यात् । न निष्ठी-वेत् ।

न विवसन स्स्नायात्। गुह्यो वा एषो ऽग्निः।
एत-स्याग्ने रन तिदा-हाय।
न पुष्कर-पर्णानि हिरण्यंवा ऽधितिष्ठेत्।
एत-स्याग्ने रन-भ्या रोहाय। न कूर्मस्या श्नीयात्।
नोदकस्या घातुका-न्येन मोदकानि भवन्ति।
अघा-तुका आपः। य एत-मग्नि श्चिनुते।
य उच्चैन-मेवं वेद॥ ११३॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद॥ (26)

इमानुकं भुवना सीष-धेम। इन्द्रश्च विश्वे च देवाः।
यज्ञ-ञ्च न-स्तन्व-ञ्च प्रजा-ञ्च। आदित्यै रिन्द्र स्स्सह-सीष धातु।
आदित्यै रिन्द्र स्सगणो मरुद्भिः। अस्माकं भूत्व-विता तनूनाम्।
आप्ल-वस्व प्रप्ल-वस्व। आण्डीभ वज मा-मुहुः।
सुखादी न्दुःख निधनाम्। प्रति-मुञ्चस्व स्वां पुरम्॥ ११४॥
मरीचय स्स्वायं-भुवाः। ये शरीराण्य कल्पयन्न्।

ते ते देह ङ्कल्पयन्तु । मा च ते ख्यास्मती-रिषत् ।

उत्तिष्ठ-त मा स्वप्त । अग्नि-मिच्छ-ध्वं भारताः ।

राज्ञ-स्सोमस्य तृप्ता-सः । सूर्येण स युजोष-सः ।

युवा सुवा साः । अष्टा-चक्रा नव द्वारा ॥ ११५ ॥

देवानां पूर-योध्या । तस्याꣳ हिरण्मयः कोशः ।

स्वर्गो लोको ज्योतिषाऽऽवृतः । यो वै तां ब्रह्मणो वेद ।

अमृतेना ऽऽवृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च ।

आयुः कीर्तिं प्रजा-न्ददुः । विभ्राजमानाꣳ हरिणीम् ।

यशसा संपरी वृताम् । पुरꣳ हिरण्मयी ब्रह्मा ॥ ११६ ॥

विवेशा ऽपराजिता । पराङ्गे-त्य-ज्या-मयी ।

पराङ्गे-त्य-नाशकी । इहचा-मुत्र-चान्वेति ।

विद्वान् देवा सुरानु-भयान् । यत्कुमारी मन्द्र-यते ।

य-द्योषि-द्यत् पति-व्रता । अरिष्टं यत्किंच क्रियते ।

अग्नि-स्तदनु वेधति । अ-शृता स-श्शृता स-श्च ॥ ११७ ॥

यज्वानो येऽप्य यज्वनः । स्वर्यन्तो नापे-क्षन्ते ।
इन्द्र-मग्नि-श्च ये विदुः । सिकता इव संयन्ति ।
रश्मि-भि-स्स मुदी-रिताः । अस्मा ल्लोकाद् मुष्माच्च ।
ऋषिभि-रदा त्पृश्नि-भिः । अपेत वीत वि-च सर्पतातः ।
येऽत्र-स्थ पुराणा ये-च नूतनाः ।
अहो-भि-रद्भि रक्तु-भि-र्व्यक्तम् ॥ ११८ ॥
यमो ददात्व वसान मस्मै । नृ मुणन्तु नृपा त्वर्यः ।
अ-कृष्टा ये-च कृष्ट-जाः । कुमारीषु कनीनीषु ।
जारिणीषु च ये हिताः । रेतः पीता आण्ड पीताः ।
अङ्गारेषु च ये हुताः । उभयान् पुत्र-पौत्र कान् ।
युवेऽहं यमराज-गान् । शत-मिन्नु शरदः ॥ ११९ ॥
अदो यद्-ब्रह्म विलबम् । पितृणाञ्च यमस्य च ।
वरुणस्या-श्विनो रग्नेः । मरुताञ्च विहाय-साम् ।
काम प्रयवणं मे अस्तु । स ह्येवास्मि सना-तनः ।

इति नाको ब्रह्मि श्रवो रायो धनम्।
पुत्रा नापो देवी रिहाऽऽहित ॥ १२० ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद ॥ (27)

विशीर्ष्णीं गृध्र शीर्ष्णी-ञ्च। अपेतो निर्ऋतिꣳ हथः।
परिबाधꣳ श्वेत कुक्षम्। निजङ्घꣳ शब-लोदरम्।
स तान् वाच्या-यया सह। अग्ने नाशय स-न्दृशः।
ईर्ष्या सूये बु-भुक्षाम्। मन्युं कृत्यां च दी-धिरे।
रथेन किꣳ शुका-वता। अग्ने नाशय स-न्दृशः ॥ १२१ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद ॥ (28)

पर्जन्याय प्रगा-यत। दिवस्पुत्राय मीढुषे।
स नो यवस मिच्छतु। इदं वचः पर्जन्याय स्वराजे।
हृदो अस्त्वन्त-रन्त द्यु-योत।
मयो-भू र्वातो विश्व-कृष्टयस्स-न्त्वस्मे।

सुपिप्पला ओषधी र्दैवगोपाः । यो गर्भ मोषधीनाम् ।
गवा ङ्कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ १२२ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (29)

पुनर्मा मैत्विन्द्रियम् । पुन-रायुः पुन-र्भगः ।
पुन-र्ब्राह्मण मैतु मा । पुन-र्द्रविण मैतु मा ।
यन्मे ऽद्य रेतः पृथिवी मस्कान् । यदोषधी-रप्य सर-द्य दापः ।
इदन्त-त्पुनरा ददे । दीर्घा युत्वाय वर्चसे ।
यन्मे रेतः प्रसिच्यते । यन्म आ-जायते पुनः ।
तेन मा ममृतं कुरु । तेन सु-प्रजस ङ्कुरु ॥ १२३ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (30)

अद्भ्य-स्तिरोधा ऽजायत । तव वै-श्रवण स्सदा ।
तिरो-धेहि सपत्ना न्नः । ये अपो ऽश्नन्ति केचन ।
त्वाष्ट्री मायां वै श्रवणः । रथꣳ सहस्र वन्धुरम् ।

पुरु श्चक्रꣳ सहस्रा-श्वम्। आस्था-या याहि नो बलिम्।

यस्मै भूतानि बलिमा वहन्ति।

धन ङ्गावो हस्ति हिरण्य मश्वान्॥ १२४॥

अ साम सुमतौ यज्ञिय-स्य। श्रियं बिभ्रतोऽन्न मुखी विराजम्।

सुदर्शने च क्रो-ञ्चे च। मै नागे च महा गिरौ।

शत द्वाद्वार गमन्ता। सꣳ हार्य न्नगरं तव।

इति मन्त्राः। कल्पोऽत ऊर्ध्वम्। यदि बलिꣳ हरेत्।

हिरण्यना भये वितु-दये कौबेरा-या-यं बलिः॥ १२५॥

सर्व भूताधि-पतये नम इति। अथ बलिꣳ हृत्वोप तिष्ठेत।

क्षत्रं क्षत्रं वै श्रवणः। ब्राह्मणा वयꣴ स्मः।

नमस्ते अस्तु मा मा हिꣳसीः। अस्मा त्प्रविश्या न्नम द्धीति।

अथ-त मग्निमा दधीत। यस्मि-न्नेत त्कर्म प्रयुञ्जीत।

तिरोधा भूः। तिरोधा भुवः॥ १२६॥

तिरोधा-स्स्वः। तिरोधा भूर्भुवस्स्वः।

सर्वेषां लोकाना-माधि-पत्ये सी देति । अथ तमग्नि मिन्धीत ।
यस्मि-न्नेत त्कर्म प्रयुञ्जीत । तिरोधा भू-स्स्वाहा ।
तिरोधा भुव-स्स्वाहा । तिरोधा स्स्व -स्स्वाहा ।
तिरोधा भू-र्भुव-स्स्व-स्स्वाहा ।
यस्मि-न्नस्य काले सर्वा आहुतीर् हुता भवे युः ॥ १२७ ॥

अपि ब्राह्मण मुखीनाः । तस्मि न्नह्नः काले प्रयुन्ञ्जीत ।
पर स्सुप्त जना-द्वेपि । मास्म प्रमाद्यन्त माध्या पयेत् ।
सर्वार्था स्सिद्ध्यन्ते । य एवं वेद ।
क्षुध्य-न्निद मजान-ताम् । सर्वार्था न सिद्ध्यन्ते ।
यस्ते विघातु-को भ्राता । ममान्त र्हृदये श्रितः ॥ १२८ ॥

तस्मा इम-मग्र पिण्ड ञ्जुहोमि । स मे ऽर्थान्मा विवधीत् ।
मयि स्वाहा । राजाधि-राजाय प्रसह्य-साहिने ।
नमो वयं वै-श्रवणाय कुर्महे । स मे का-मान्काम-कामाय मह्यम् ।
कामेश्वरो वै-श्रवणो ददातु । कुबेराय वै-श्रवणाय ।

महाराजाय नमः । केतवो अरुणा-सश्च । ऋषयो वात-रशनाः ।
प्रतिष्ठाꣳ शत-धा हि । समा-हितासो सहस्र धायसम् ।
शिवान-श्शन्तमा भवन्तु । दिव्या आप ओषधयः ।
सु-मृडीका सरस्वति । मा ते व्योम स-न्दृशि ॥ १२९ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ।
ॐ नमो नारायणाय । स्वामिन् प्रसीद प्रसीद ॥ (31)

संवत्सरमे तद् व्रतं चरेत् । द्वौ वा मासौ ।
नियम-स्स मासेन । तस्मि-न्नियम विशेषाः ।
त्रिषवण मुद-कोप स्पर्शी । चतुर्थ-काल पानभ स्तस्यात् ।
अहर-हर्वा भैक्षम श्नीयात् । औदुंबरी-भि स्समिद्भि रग्निं परिचरेत् ।
पुनर्मा मैत्त्वि-न्द्रिय नित्ये-तेना-ऽनुवाकेन ।
उद्धृत परि-पूताभि रद्भिः कार्यं कुर्वीत ॥ १३० ॥
अ-सञ्चय-वान् । अग्नये वायवे सूर्याय । ब्रह्मणे प्रजापतये ।
चन्द्रमसे नक्षत्रेभ्यः । ऋतुभ्य-स्संवत्सराय ।
वरुणा-यारुणा येति व्रत-होमाः । प्रवर्ग्य-वदा देशः ।

अरुणाः काण्ड-ऋषयः। अरण्ये ऽधीयी-रन्न्।
भद्र-ङ्कर्णेभि-रिति द्वे जपित्वा ॥ १३१ ॥

महा-नाम्नी भिरुद कꣳ सꣳ स्पर्श्य।
तमाचार्यो दद्यात्। शिवान-श्शान्तमे त्योषधीरा लभते।
सुमृडी-केति भूमिम्। एव-मप वर्गे। धेनु र्दक्षिणा।
कꣳ सं वा सश्च क्षौमम्। अन्य-द्वा शुक्लम्।
यथा-शक्ति वा। एवꣳ स्वाध्याय -धर्मेण। अरण्येऽधीयीत।
तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ १३२ ॥

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः।
ॐ नमो नारायणाय। स्वामिन् प्रसीद प्रसीद ॥ (32)

ॐ भद्रङ्कर्णेभिः शृणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः। व्यशेम देवहितं यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु ॥१३३

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# CONCLUDING SLOKAS OF SOORYANAMASKARAM

ॐ अच्युताय नमः। ॐ आनन्दाय नमः। ॐ गोविंदाय नमः।

केशवा। नारायणा। माधवा। गोविंदा। विष्णो। मधुसूदना।

त्रिविक्रमा। वामना। श्रीधरा। हृषीकेशा। पद्मनाभा। दामोदरा॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।

प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये॥

ॐ भूः।ॐ भुवः।ॐ स्वः।ॐ महः।

ॐ जनः। ॐ तपः। ॐ सत्यम्।

ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही धियो यो नः प्रचोदयात्॥

ॐ आपो ज्योति रसो ऽमृतं ब्रह्म भूर्भुवस्सुवरोम्॥

ॐ ध्येयः सदा सवितृ-मण्डल-मध्यवर्ती,

नारायण: सरसिजासन-सन्निविष्टः।

केयूरवान् मकरकुण्डलवान् किरीटी,

हारी हिरणमयवपुर्धृतशंखचक्रः॥

ॐ मित्राय नमः। ॐ रवये नमः। ॐ सूर्याय नमः।

ॐ भानवे नमः। ॐ खगाय नमः।ॐ पूष्णे नमः।

ॐ हिरण्यगर्भाय नमः।ॐ मरीचये नमः। ॐ आदित्याय नमः।

ॐ सवित्रे नमः। ॐ अर्काय नमः। ॐ भास्कराय नमः।

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ॥

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।

आयुः प्रज्ञा बलं वीर्यं तेजस्तेषां च जायते ॥

आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।

जन्मान्तरसहस्रेषु दारिद्रियं दोष नाशते ॥

योगेन चित्तस्य पदेन वाचा मलं शरीरस्य च वैद्यकेन।

योपाकरोत्तं प्रवरं मुनीनां पतंजलिं प्रांजलिरानतोऽस्मि ॥

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।

विश्वमाभासि रोचनम्। उपयामगृहीतोऽसि सूर्याय

त्वा भ्राजस्वत एव ते योनिस्सूर्याय त्वा भ्राजस्वते ।

श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः ॥

घृणिस्सूर्य आदित्यो न प्रभा वात्यक्षरम्। मधु क्षरन्ति तद्रसम्।
सत्यं वै तद्रसमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्।
श्री छाया सुवर्चलांबा समेत श्री सूर्य नारायण स्वामिने नमः॥

उद्य-न्नद्य मित्र-महः। आ-रोह-न्नुत्तरां दिवम्। हृ-द्रोगं मम सूर्य।
हरिमाणं च नाशय। शुकेषु मे हरिमाणम्। रोपणा-कासु दध्म-सि॥
अथो हारिद्र-वेषु मे। हरिमाणं निदध्म-सि। उदगा-दय-मादित्यः।
विश्वेन सहसा सह। द्विषन्तं मम रन्ध-यन्न्। मो अहं द्विषतो रधम्।
यो नः शपाद-शपतः। यश्च नः शपतः शपात्।
उषाश्च तस्मै निम्रु-क्च। सर्वं पापꣳ समू-हताम्॥

अकालमृत्यु हरणं सर्वव्याधि विनाशनम्।
सूर्यनारायणपादोदकं तीर्थं जठरे धारयाम्यहम्॥

आराधितानां देवतानां पुनः पूजाम् करिष्ये॥
श्री सूर्यनारायण स्वामि देवताभ्यो नमः॥
पूजांते छत्रं समर्पयामि। चामरं समर्पयामि।
नृत्यं समर्पयामि। गीतं समर्पयामि।

वाद्यं समर्पयामि । आंदोलिक् आरोहणं समर्पयामि ।

अश्वारोहणम् समर्पयामि । गजारोहणं समर्पयामि ।

श्री सूर्यनारायण देवताभ्यो नमः ।

**भास्कराय विद्महे मह-द्युतिकराय धीमहि ।**

**तन्नो आदित्यः प्रचोदयात् ॥**

**आदित्याय विद्महे सहस्र-किरणाय धीमहि ।**

**तन्नो भानुः प्रचोदयात् ॥**

समस्त राजोपचार देवोपचार शक्त्युपचार भक्त्युपचार पूजां समर्पयामि ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।

यत्पूजितं मयादेव परिपूर्णं तथास्तु मे ॥

अनेन मया क्रतेन श्रीसूर्यनारायण देवता सुप्रीत सुप्रसन्न वरदो भवतु ।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।

करोमि यद्यत् सकलं परस्मै सूर्यनारायणेति समर्पयामि ॥

॥ श्री कृष्णार्पणमस्तु ॥

# ॥ नवग्रह स्तोत्रम् ॥

जपा कुसुम संकाशं काश्यपेयं महद्युतिम् ।

तमोऽरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥

दधि शङ्ख तुषाराभं क्षीरो दार्णव संभवम् ।

नमामि शशिनं सोमं शम्भो र्मुकुट भूषणम् ॥ २ ॥

धरणी गर्भ संभूतं विद्युत्कान्ति समप्रभम् ।

कुमारं शक्ति हस्तं तं मङ्गलं प्रणमाम्यहम् ॥ ३ ॥

प्रियङ्गु कलिका श्यामं रूपेणा प्रतिमं बुधम् ।

सौम्यं सौम्य गुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥

देवानां च ऋषीणां च गुरुं काञ्चन संनिभम् ।

बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥

हिमकुन्द मृणालाभं दैत्यानां परमं गुरुम् ।

सर्व शास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥

नीलांजन समाभासं रविपुत्रं यमा ग्रजम् ।
छाया मार्तण्ड संभूतं तं नमामि शनैश्चरम् ॥ ७ ॥

अर्धकायं महावीर्यं चन्द्रादित्य विमर्दनम् ।
सिंहिका गर्भ संभूतं तं राहुं प्रणमाम्यहम् ॥ ८ ॥

पलाश पुष्प संकाशं तारकाग्रह मस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥

॥ फलश्रुतिः ॥

इति व्यास मुखोद्गीतं यः पठे त्सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशान्ति र्भविष्यति ॥ १० ॥

नर नारी नृपाणां च भवे द्दुःस्वप्न नाशनम् ।
ऐश्वर्य मतुलं तेषा मारोग्यं पुष्टि वर्धनम् ॥

गृहनक्षत्रजाः पीडा स्तस्कराग्नि समुद्भवाः ।
ताः सर्वाः प्रशमं यान्ति व्यासो ब्रूते न संशयः ॥ ११ ॥

॥ इति श्रीव्यासविरचितं नवग्रहस्तोत्रं संपूर्णम् ॥

# ॥ आदित्यहृदयम् ॥

असय श्री आदित्यहृदय स्तोत्र महामन्त्रस्य ,

अगस्त्यो भगवान् ऋषिः , अनुष्ठुप् छंदः ,

आदित्यात्मिक श्रीमन् सूर्यनारायणो देवता ।

॥ सर्वत्र जय सिध्यर्ते जपे विनियोगः ॥

॥ ध्यानम् ॥

जयतु जयतु सूर्यं सप्त लोकैक दीपम्

किरण शमित पापं क्लेश दुखःस्य नाशम् ।

अरुण निगम गम्यम् चारुमादित्य मूर्तिं

सकल भुवन वंद्यं भास्करम् तं नमामि ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।

रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥ १ ॥

दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम् ।

उपागम्याब्रवीद् राममगस्त्यो भगवान् ऋषिः ॥ २ ॥

राम राम महाबाहो शृणु गुह्यं सनातनम् ।

येन सर्वानरीन्वत्स समरे विजयिष्यसि ॥ ३ ॥

आदित्यहृदयं पुण्यं सर्व शत्रु विनाशनम् ।
जयावहं जपेन्नित्यमक्षय्यं परमं शुभम् ॥ ४ ॥
सर्व मङ्गळ माङ्गल्यं सर्व पाप प्रणाशनम् ।
चिन्ता शोक प्रशमन मायु र्वर्धन मुत्तमम् ॥ ५ ॥
रश्मि मन्तं समुद्यन्तं देवा सुर नमस्कृतम् ।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः ।
येष देवा सुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥
येष भ्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः ।
महेन्द्रो धनदः कालो यमः सोमोह्यापांपतिः ॥ ८ ॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः ।
वायुर्वह्निः प्रजा प्राण ऋतु कर्ता प्रभाकरः ॥ ९ ॥
आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।
सुवर्ण सदृशो भानुः स्वर्ण रेता दिवाकरः ॥ १० ॥
हरिदश्वः सहस्रार्चिः सप्त सप्ति र्मरीचिमान् ।
तिमिरोन्मथनः शम्भु स्त्वष्टा मार्ताण्ड अंशुमान् ॥ ११ ॥

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः।
अग्नि गर्भोऽदितेः पुत्रः शङ्खः शिशिर नाशनः॥ १२॥
व्योमनाथ स्तमोभेदी ऋग्यजु स्साम पारगः।
घन वृष्टिरपां मित्रो विन्ध्यवीथी प्लवङ्गमः॥ १३॥
आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः॥ १४॥
नक्षत्र ग्रह ताराणा मधिपो विश्व भावनः।
तेजसा मपि तेजस्वी द्वादशात्म न्नमोऽस्तुते॥ १५॥
नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः॥ १६॥
जयाय जयभद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्रांशो आदित्याय नमो नमः॥ १७॥
नम उग्राय वीराय सारङ्गाय नमो नमः।
नमः पद्म प्रबोधाय मार्ताण्डाय नमो नमः॥ १८॥
ब्रह्मेशानाच्युतेशाय सूर्या यादित्य वर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः॥ १९॥

तमोघ्नाय हिमघ्नाय शत्रुघ्नाया मितात्मने ।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥
तप्तचामीकराभाय वह्नये विश्वकर्मणे ।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥
नाशयत्येष वै भूतं तदेव सृजति प्रभुः ।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।
एष एवाग्नि होत्रञ्च फल ञ्चैवाग्नि होत्रिणाम् ॥ २३ ॥
वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च ।
यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥

॥ फलश्रुतिः ॥

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषुच ।
कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥
पूजयस्वै नमेकाग्रो देवदेवं जगत्पतिम् ।
एतत् त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥
अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि ।
एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम् ॥ २७ ॥

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा ।
धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥ २८ ॥
आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान् ।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥

रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत् ।
सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥
अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः ।
निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ॥ ३१ ॥

सूर्यं सुन्दर लोकनादऽमृतं वेदान्त सारं शिवं
ज्ञानं ब्रह्ममयम् सुरेशममलम् लोकैक चित्तस्वयम् ।
इन्द्रादित्य नरादिवं सुरगुरुं त्रैलोक चूडामणिम्
विष्णुब्रह्मशिव स्वरूप हृदयम् वन्दे सदा भास्करम् ॥
भानोभास्कर मार्ताण्ड श्चण्ड रश्मि दिवाकरा
आयुरारोग्यमैश्वर्यं विध्यान्देहि नमोस्तुते ॥

# ॥ इन्द्राक्षी स्तोत्रम् ॥

पूर्वन्यासः

अस्य श्री इन्द्राक्षीस्तोत्रमहामन्त्रस्य,

पुरन्दर ऋषिः, अनुष्टुप् छन्दः, इन्द्राक्षी देवता,

लक्ष्मीं बीजं, भुवनेश्वरीं शक्तिः, महेश्वरीं कीलकम्,

इन्द्राक्षीप्रसादसिद्ध्यर्थे जपे विनियोगः।

करन्यासः

ॐ इन्द्राक्षीं अङ्गुष्ठाभ्यां नमः।

ॐ भुवनेश्वरीं तर्जनीभ्यां नमः।

ॐ महेश्वरीं मध्यमाभ्यां नमः।

ॐ अम्बुजाक्षीं अनामिकाभ्यां नमः।

ॐ कात्यायनीं कनिष्ठिकाभ्यां नमः।

ॐ कौमारीं करतलकरपृष्ठाभ्यां नमः।

अङ्गन्यासः

ॐ इन्द्राक्षीं हृदयाय नमः।

ॐ भुवनेश्वरीं शिरसे स्वाहा।

ॐ महेश्वरीं शिखायै वषट्।

ॐ अम्बुजाक्षीं कवचाय हुम्।

ॐ कात्यायनीं नेत्रत्रयाय वौषट्।

ॐ कौमारीं अस्त्राय फट्।

ॐ भूर्भुवः स्वरोम् इति दिग्बन्धः ॥

ध्यानम्

नेत्राणा-न्दश-भिश्शतैः परिवृता-मत्युग्र-चर्माम्बरां
हेमाभां युवतीं विळम्बित-शिखा-मामुक्त-केशाननाम् ।

घण्टा-मण्डित-पादपद्म-युगळां नागेन्द्र-कुम्भस्तनीं
इन्द्राक्षीं हृदि चिन्तयामि सततं प्रत्यक्ष-सिद्धिप्रदाम् ॥

इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्र-द्वयान्विताम् ।
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥

इन्द्राक्षीं सहयुवतीं नानालङ्कार-भूषिताम् ।
प्रसन्न-वदनाम्भोजा-मप्सरो-गणसेविताम् ॥

इन्द्रादिभिः सुरैर्वन्द्यां वन्दे शङ्कर-वल्लभाम् ।
एवं ध्यात्वा महादेवीं जपे-दिष्टार्थ-सिद्धये ॥

इन्द्र उवाच ।

इन्द्राक्षी नाम सा देवी दैवतैः समुदा-हृता ।
गौरी शाकम्भरी देवी दुर्गा नाम्नीति विश्रुता ॥

कात्यायनी महादेवी चण्डखण्डा महातपाः ।
सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥

नारायणी भद्रकाळी रुद्राणी कृष्णपिङ्गला ॥
अग्निज्वाला रौद्रमुखी कालरात्री तपस्विनी ।
मेघस्वना सहस्राक्षी विकटाङ्गी जडोदरी ।
महोदरी मुक्तकेशी घोररूपा महाबला ॥
अजिता भद्रदाऽनन्दा रोगहर्त्री शिवप्रिया ।
शिवदूती कराली च शक्तिश्च परमेश्वरी ॥
महिषासुर-संहारी चामुण्डाऽसुर मर्दिनी ।
इन्द्राणी चेन्द्ररूपी च इन्द्रशक्तिः परायणी ॥
शिवा च शिवरूपा च शिवशक्तिः परायणी ।
सदा सम्मोहिनी देवी सुन्दरी भुवनेश्वरी ॥
आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा ।
वाराही नारसिंही च भीमा भैरवनादिनी ॥
श्रुतिः स्मृति-र्धृति-र्मेधा विद्या लक्ष्मीः सरस्वती ।
अनन्ता विजयाऽपर्णा मानस्तोकाऽपराजिता ॥
भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा ।
शिवा भवानी रुद्राणी शङ्करार्ध-शरीरिणी ॥

मृत्युञ्जयी महामायि सर्वरोग प्रणाशिनी ।
ऐरावत-गजारूढा भूषिता कनकप्रभा ॥

एतैर्नाम-पदै-र्दिव्यै स्तुता शक्रेण धीमता ।
आयुरारोग्य-मैश्वर्य-मपमृत्यु-भयापहम् ॥

क्षयापस्मार-कुष्ठादि तापज्वर-निवारणम् ।
शीत-ज्वर-निवारणं सन्निज्वर-निवारणम् ।
उष्ण-ज्वर-निवारणं सर्व-ज्वर -निवारणम् ।
सर्वरोग-निवारणम् । सर्वमङ्गल वर्धनम् । सर्वशत्रु विनाशनम् ।

शतमावर्तये-द्यस्तु मुच्यते व्याधिबन्धनात् ।
आवर्तयन्सहस्त्रं तु लभते वाञ्छितं फलम् ॥

एतत्स्तोत्रं जपेन्नित्यं सर्व व्यादि विनाशनम् ।
रणे राजभये चोरे सर्वत्र विजयी भवेत् ॥

सर्वमङ्गल-माङ्गल्ये शिवे सर्वार्थ-साधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥

त्रिपाद् भस्म प्रहरण स्त्रिशिरा रक्त लोचनः ।
स मे प्रीति सुखं दद्यात् सर्वामय पतिर्ज्वरः ॥

ज्वरं च ज्वरसारं च ज्वराति सारमेव च ।
सन्निपात ज्वरश्चैव शीतोष्ण ज्वरमेव च ॥

कुबेरन्ते मुखं रौद्रं नन्दिमानन्दिमावह ।
ज्वरं मृत्युभयं घोरं ज्वरं नाशयते ज्वरः ।

ज्वर राजाय विद्महे त्रिशिरस्काय धीमहि, तन्नो ज्वरः प्रचोदयात् ॥
भस्मा युदाय विद्महे रक्तनेत्राय धीमहि, तन्न स्त्रिपात् प्रचोदयात् ॥
ज्वाला मालाय विद्महे वज्रदंष्ट्राय धीमहि, तन्नो ज्वरहरः प्रचोदयात् ॥

मृत्योस्तुल्यं त्रिलोकीं ग्रसितु-मति-रसा न्निस्सृताः किन्नु जिह्वाः
किं वा कृष्णाङ्घ्रि-पद्म-द्युतिभि-ररुणिता विष्णु-पद्याः पदव्यः ।
प्राप्ताः सन्ध्याः स्मरारेः स्वयमुत नुतिभि स्तिस्त्र इत्यूह्यमानाः
देवैर्देव्या-स्त्रिशूलक्षत-महिषजुषो रक्तधारा जयन्ति ॥

श्री महादेव्यै नमः ॥

मातर्मे मधुकैट-भघ्नि महिष-प्राणा-पहा-रोद्यमे
हेला-निर्मित धूम्रलोचन-वधे हे चण्डमुण्डार्दिनि ।
निश्शेषी-कृत रक्तबीज-दनुजे नित्ये निशुंभापहे
शुंभध्वंसिनि संहराशु दुरितं दुर्गे नमस्तेऽम्बिके ॥

अष्टौ भुजाङ्गीं महिषस्य मर्दिनीम्
सशङ्खचक्रां शरशूल धारिणीम्
तां दिव्य योगीं सहजात वेदसीम्
दुर्गां सदा शरणमहं प्रपद्ये ॥

आयुर्देहि धनंदेहि विद्यांदेहि महेश्वरी
समस्त अखिलाम् देहि देहिमे परमेश्वरी ॥

अन्यथा शरणम् नास्ति त्वमेव शरणम् मम
तस्मात् कारुण्य भावेन रक्ष रक्ष महेश्वरी ॥

यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि नारायणि नमोऽस्तु ते ॥

विसर्ग-बिन्दु-मात्राणि पद-पादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व परमेश्वरी ॥

॥ इति इन्द्राक्षी-स्तोत्रं सम्पूर्णम् ॥

# ॥ श्री हनुमान चालीसा॥

## ।।दोहा।।

श्री गुरु चरण सरोज रज, निज मन मुकुर सुधार |

बरनौ रघुवर बिमल जसु , जो दायक फल चारि |

बुद्धिहीन तनु जानि के , सुमिरौ पवन कुमार |

बल बुद्धि विद्या देहु मोहि हरहु कलेश विकार ||

## ।।चौपाई।।

जय हनुमान ज्ञान गुन सागर, जय कपीस तिंहु लोक उजागर |

रामदूत अतुलित बल धामा अंजनि पुत्र पवन सुत नामा ||

महाबीर बिक्रम बजरंगी कुमति निवार सुमति के संगी |

कंचन बरन बिराज सुबेसा, कान्हन कुण्डल कुंचित केसा ||

हाथ ब्रज औ ध्वजा विराजे कान्धे मूंज जनेऊ साजे |

शंकर सुवन केसरी नन्दन तेज प्रताप महा जग बन्दन ||

विद्यावान गुनी अति चातुर राम काज करिबे को आतुर |

प्रभु चरित्र सुनिबे को रसिया रामलखन सीता मन बसिया ||

सूक्ष्म रूप धरि सियंहि दिखावा बिकट रूप धरि लंक जरावा |

भीम रूप धरि असुर संहारे रामचन्द्र के काज सवारे ||

लाये सजीवन लखन जियाये श्री रघुबीर हरषि उर लाये |

रघुपति कीन्हि बहुत बड़ाई तुम मम प्रिय भरत सम भाई ||

सहस बदन तुम्हरो जस गावें अस कहि श्रीपति कण्ठ लगावें |

सनकादिक ब्रह्मादि मुनीसा नारद सारद सहित अहीसा ||

जम कुबेर दिगपाल कहाँ ते कबि कोबिद कहि सके कहाँ ते |

तुम उपकार सुग्रीवहिं कीन्हा राम मिलाय राज पद दीन्हा ||

तुम्हरो मन्त्र विभीषन माना लंकेश्वर भये सब जग जाना |

जुग सहस्त्र जोजन पर भानु लील्यो ताहि मधुर फल जानु ||

प्रभु मुद्रिका मेलि मुख मांहि जलधि लाँघ गये अचरज नाहिं |

दुर्गम काज जगत के जेते सुगम अनुग्रह तुम्हरे तेते ||

राम दुवारे तुम रखवारे होत न आज्ञा बिनु पैसारे |

सब सुख लहे तुम्हारी सरना तुम रक्षक काहें को डरना ||

आपन तेज सम्हारो आपे तीनों लोक हाँक ते काँपे |

भूत पिशाच निकट नहीं आवें महाबीर जब नाम सुनावें ||

नासे रोग हरे सब पीरा जपत निरंतर हनुमत बीरा |

संकट ते हनुमान छुडावें मन क्रम बचन ध्यान जो लावें ||

सब पर राम तपस्वी राजा तिनके काज सकल तुम साजा |

और मनोरथ जो कोई लावे सोई अमित जीवन फल पावे ||

चारों जुग परताप तुम्हारा है परसिद्ध जगत उजियारा |

साधु संत के तुम रखवारे। असुर निकंदन राम दुलारे ||

अष्ट सिद्धि नौ निधि के दाता। अस बर दीन्ह जानकी माता

राम रसायन तुम्हरे पासा सदा रहो रघुपति के दासा ||

तुम्हरे भजन राम को पावें जनम जनम के दुख बिसरावें |

अन्त काल रघुबर पुर जाई जहाँ जन्म हरि भक्त कहाई ||

और देवता चित्त न धरई हनुमत सेई सर्व सुख करई |

संकट कटे मिटे सब पीरा जपत निरन्तर हनुमत बलबीरा ||

जय जय जय हनुमान गोसाईं कृपा करो गुरुदेव की नाईं |

जो सत बार पाठ कर कोई छूटई बन्दि महासुख होई ||

जो यह पाठ पढे हनुमान चालीसा होय सिद्धि साखी गौरीसा |

तुलसीदास सदा हरि चेरा कीजै नाथ हृदय मँह डेरा ||

## ।।दोहा।।

पवन तनय संकट हरन मंगल मूरति रूप |

राम लखन सीता सहित हृदय बसहु सुर भूप ||

**॥ सियावर रामचंद्रजी की जय ॥ पवनसुत हनुमान की जय॥**

आभिर्गीर्भिर्यदतो न उनमाप्यायय हरिवो वर्धमानः ।

यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥

ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# ॥ श्री गुरुभ्यो नमः ॥



॥ हरिः ओम् ॥

तत्सद् ब्रह्मार्पणमस्तु । यद्भद्रम् तन्म आसुव ॥

*Book Compiled By Shri N K Venkitaraman.*

[ For a free copy of printable PDF file write to nkv.nvr@gmail.com]



# SOORYANARAYANA DEVATA